सप्तमे ब्राह्मणमुपनयीत[3] पञ्चमे ब्रह्मवर्चसकामं नवमे त्र्यायुष्काममेकादशे क्षत्रियं द्वादशे वैश्यं' नाति षोडशमुपनयीत[4]' प्रसृष्टवृषणो[5] ह्येष वृषलीभूतो भवतीति' तत एनं स्नातमलंकृतमाप्तान्नं कृतनापितकृत्यमानयन्ति' तमहतेन वाससा परिदधीत परीमं सोमेति यथावर्णं' परीमं सोम ब्रह्मणा महे श्रोत्राय दध्मसि । यथेमं जरिमा णा[6] याज्ज्योक्[6] श्रोत्रे अधि जागराज्जीवाहि शरदः शतं पश्याहि शरदः शतमिति' परीममिन्द्र ब्रह्मणा महे राष्ट्राय दध्मसि । यथेमं जरिमा णा[7] याज्ज्योग्राष्ट्रे[7] अधि जागराज्जीवाहि शरदः शतं पश्याहि शरदः शतमिति' परीमं पोष ब्रह्मणा महे पोषाय दध्मसि । यथेमं जरिमा णा[8] याज्ज्योक्[8] पोषे अधि जागराज्जीवाहि शरदः शतं पश्याहि शरदः शतमित्यथैनं पश्चादग्नेः प्राङ्मुखमुपवेश्य यज्ञोपवीतिनमाचार्य आचामयत्याचान्तमुत्थाप्योत्तरतो ऽग्नेः प्राचो दर्भानास्तीर्य तेष्वक्षतमश्मानमत्याधाय तत्रैनं दक्षिणेन पादेनाश्मानमधिष्ठापयेदिममश्मानमारोहाश्मेव त्वं स्थिरो भव द्विषन्तमपबाधस्व[9] मा च त्वा द्विषतो वधीदित्यथैनं पश्चादग्नेः प्राङ्मुखमुपवेश्योत्तरत आचार्यो ऽन्वारब्धे जुहुयान्महाव्याहृतिभिर्हुत्वा वेदाहुतिभिश्च' संपातमास्ये भूर्भुवः[10] स्वाहेति प्रतिमन्त्रं' भूर्भुवः[10]

---

१ आयु° B. २ स्तु B. ३ उपनयते B; उपनयेत $M^2$. उपनीयत $M^1$.
४ Zoo B; उपनीयत $M^1$; उपनयेत $M^2$. ५ प्रसस्त° $M^1$, $M^2$.
६ यायाज्यो° B, $M^1$, $M^2$. ७ यायज्ज्यो° B; यायाज्यो° $M^1$; ontbreekt in $M^2$.
८ यायाज्ज्यो° B; यायाज्यो° $M^1$; ontbreekt in $M^2$. ९ अवबाध° $M^1$ $M^2$.
१० De visarga niet in de HSS.

स्वाहा भुवो यजूंषि स्वाहा स्वः सामानि स्वाहेति' प्राशितमाचान्तमुत्थाप्य नमो वातायेत्येनं[1] प्रदक्षिणमग्निं परिणयेन्नमो वाताय नमो अस्त्वग्नये[2] नमः पृथिव्यै नम ओषधीभ्यो नमो वो ऽदृष्टाय बृहते करोमीत्यधिगन्तरधिगच्छ' प्रदातः प्रयच्छासावमुष्मै वेदमित्यथैनं पश्चादग्नेः प्राङ्मुखमवस्थाप्य पुरस्तादाचार्यः प्रत्यङ्मुखस्तावञ्जली कुरुत' उत्तरत आचार्यस्तमन्वो[3] ऽद्भिः पूरयेन्निस्राविणेतरस्य पूरणमथैनं संशास्ति ब्रह्मचर्यमगामुप मा नयस्वेति' को नामासीत्यसाविति नामधेयं दद्यात्तत्राचार्यो जपति हिं भूर्भुवः स्वरागन्मा समगन्महि प्र सु मर्त्यं युयोतन। अरिष्टाः संचरेमहि स्वस्ति चरतादयमित्यथास्य दक्षिणेन हस्तेन दक्षिणं हस्तं गृह्णातीन्द्रस्ते हस्तमग्रभीद्धाता[4] हस्तमग्रभीत्पूषा हस्तमग्रभीत्सविता हस्तमग्रभीदर्यमा हस्तमग्रभीन्मित्रस्त्वमसि धर्मणाग्निराचार्यस्तवेति' प्राणानां ग्रन्थिरसीति नाभिदेशमारभ्य[5] जपति प्राणानां ग्रन्थिरसि मा विस्रसामृत मृत्योरन्तरं कुर्विति' दक्षिणमंसमन्ववमृश्य मयि व्रत इति हृदयदेशमारभ्य[5] जपति मयि व्रते हृदयं ते अस्तु मम चित्तमनु चित्तं ते अस्तु। मम वाचमेकव्रतो जुषस्व बृहस्पतिस्त्वा नियुनक्तु मयीत्यथैनं परिददात्यग्नये त्वा परिददामि वायवे त्वा परिददामि देवाय त्वा सवित्रे परिददाम्यद्भ्यस्त्वौषधीभ्यः परिददामि सर्वेभ्यस्त्वा देवेभ्यः परिददामि सर्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्ट्या इत्यथैनं संशास्ति ब्रह्मचार्यसि समिध आधेह्यपो ऽशान कर्म कुरु मा दिवा स्वाप्सीरित्यग्नये समिधमाहार्षमिति घृतेनाक्ताः समिध आदधात्यग्नये

---

१ Vgl. pag. 5, noot 6.

२ स्वग्न° M[1], M[2].

३ आचार्य:तम° B; आचार्यस्यतन° M[2]; आचार्यस्यतम° M[1].

४ M[1] hier en verderop steeds अग्रहीत्

५ आलभ्य M[2], B.

समिधमाहार्षं[1] बृहते जातवेदसे । यथा त्वमग्ने समिधा समिध्यस एवमहमायुषा वर्चसा तेजसा सन्या मेधया प्रज्ञया[2] प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन धनेन समेधिषीय स्वाहा ॥ अप्सरासु या मेधा गन्धर्वेषु च यन्मनः । दैवी मेधा मनुष्यजा सा मां मेधा सुरभिर्जुषतां स्वाहा ॥ भूः[3] स्वाहा भुवः[3] स्वाहा स्वः[3] स्वाहा भूर्भुवः[3] स्वः[3] स्वाहेतीयं दुरुक्तादिति मेखलामाबध्नीत इयं दुरुक्तात्परिबाधमाना वर्णं पवित्रं पुनती म आगात् । प्राणापानाभ्यां बलमाभरन्ती स्वसा देवी सुभगा मेखलेयम् ॥ ऋतस्य गोप्त्री तपसः परस्पी[4] घ्नती रक्षः सहमाना अरातीः । सा मा समन्तादभिपर्येहि भद्रे भर्तारस्ते मेखले मा रिषामेति' मौञ्जीं ब्राह्मणस्य मौर्वीं राजन्यस्य मुञ्जमिश्रां तामलीं[5] वैश्यस्य मौञ्जीं वा सर्वेषामेव परिधानानि' क्षौमं वा शाणं वाहतं' ब्राह्मणस्यैणेयमुत्तरं रौरवं राजन्यस्याजं वैश्यस्यैणेयं वा सर्वेषां' स्वस्त्ययनोऽसीति दण्डं प्रयच्छेत्प्राणसंमितं' पालाशं ब्राह्मणस्य बैल्वं ब्रह्मवर्चसकामस्य नैयग्रोधं राजन्यस्यौदुम्बरं वैश्यस्य पालाशं वा सर्वेषां' मातरं प्रथमं भिक्षेतायान्याः[6] सुहृदो[7]' भवत्पूर्वया ब्राह्मणो भिक्षेत भवति भिक्षां देहीति' भवन्मध्यमया राजन्यो भिक्षां भवति देहीति' भवदन्त्यया वैश्यो देहि भिक्षां भवतीति' क्षां च क्षिं च न वर्धयेद्भवत्पूर्वया वा सर्वे' प्रायश्चित्तं चेदुत्पद्येत जीवा स्थ जीवयत मेत्येनमप आचामयेज्जीवा स्थ जीवयत मापो नाम स्थामृता नाम स्थ स्वधा

१ आहारिषम् B. २ प्रसूया B. ३ Alle MSS. zonder visarga.

४ परस्पो: en परस्पती M² tekst en comm.; परिस्त्री B tekst en comm., M¹.

५ तामलीं B; तमलीं M¹, M².

६ Zoo slechts M²; °न्या: B, M¹.

७ सुहृद: M¹, M²; सुहृदं B.

नाम स्थ तासां वो भुक्षिषीय[१] सुमतौ मा धत्त शिवा मे भवत नमो वो ऽस्तु मा मा हिंसिष्टेति ' भैक्षमुपन्याहृतमूर्ध्वं[२] त्रिरात्रात्सावित्रीं प्रब्रूयात्तदहर्वा ' पश्चादग्नेः पच्छो ऽर्धर्चशः सर्वामित्यनूच्य वेदमारभ्याग्ने व्रतपत इति घृतेनाक्ताः समिध आदधात्यग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां स्वाहा । वायो व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां स्वाहा । आदित्य व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां स्वाहा । व्रतानां व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां स्वाहेति ' तदेतद्व्रतादेशनं सर्वत्र ' व्रतसमाप्तावग्ने व्रतपते व्रतमचारिषं तदशकं तन्मे ऽराधि स्वाहेति मन्त्रान्संनमयेदथैनं संशास्ति ब्रह्मचार्याचार्याधीनः प्रशान्तो ऽधःशायी दण्डमेखलाजिनजटाधारी स्त्र्यनृतमधुमांसगन्धमाल्यवर्जी भवेति त्रिरात्रमक्षारालवणाश्यूर्ध्वं[३] त्रिरात्रात्प्राचीं वोदीचीं वा दिशमुपनिष्क्रम्य पलाशं[3] गत्वा व्याहृतिभिरभ्यर्च्य स्थालीपाकेनेष्ट्वा यज्ञोपवीतं[४] दण्डमित्युदस्य प्रत्येयादहैर्दक्षिणा ' ॥ १२ ॥

सायंप्रातरुदकान्ते पूतो भूत्वा सपवित्रो ऽद्भिर्मार्जयेतापो हि ष्ठीयाभिस्तिसृभिस्तरत्स मन्दी धावतीति चतसृभिर्वामदेव्यमन्ते ' शुचौ देशे दर्भेष्वासीनो दर्भान्धारयमाणः प्रत्यङ्मुखो वाग्यतः सन्ध्यां मनसा ध्यायेदा नक्षत्राणामुदयादुदितेषु नक्षत्रेषु त्रीन्प्राणायामान्धारयित्वा सावित्रीं सहस्रकृत्व आवर्तयेच्छतकृत्वो वा दशावरमंवाग्निमुपतिष्ठते ऽग्ने त्वं नो अन्तम इत्यथ वरुणमुपतिष्ठते त्वं वरुण उत मित्र इत्येतयैवावृता प्रातः ' प्राङ्मुखस्तिष्ठन्नथादित्यमुपतिष्ठत उद्वयं तमस-

---

१ भुक्षीय B; भिक्षिषीय $M^1$, $M^2$. २ उपन्याहृत° $M^2$.

३ Zoo B; अक्षारलव° $M^2$; अक्ष्यरलव° $M^1$. 3 पालाशं de HSS.

४ Zoo $M^2$; °पवीतदण्ड° B, $M^1$.

स्परीत्यथ मित्रमुपतिष्ठते प्र मित्राय प्रार्यम्णा इति ' स यदि सूर्याभ्युदितः सूर्याभिनिम्रुक्तो वा तच्छेषं सावित्रीं मनसा ध्यायेत्सैव तत्र प्रायश्चित्तिः ॥ १३ ॥

श्रावण्यामुपाकरणं प्रौष्ठपद्यां वा ' हस्तेन ' त्रीन्प्राणायामानायम्याचम्य[1] सर्वे पुरस्ताज्जपं जपन्ति सह[2] नो[2] ऽस्तु सह नो भुनक्तु सह नो वीर्यवदस्तु मा विद्विषामहे सर्वेषां नो वीर्यवदस्त्विति ' तेभ्यः सावित्रीं प्रब्रूयाद्यथोपनयने ' मनसा सामसावित्रीं च सोमं राजानमित्यादितश्छन्दांस्यधीत्य यथार्थमन्त्रतधानानां दध्नश्च नवाहुतीर्जुहोत्यृषीन्देवांश्छन्दांस्यृचो यजूंषि सामान्यृचं साम यजामहे सदसस्पतिमद्भुतं मेधाकारमित्येतासामेव पूर्वाभिः षड्भिः पूर्वं तर्पयेदाचार्यमाचार्यांश्च[3] जैमिनिं तलवकारं सात्यमुग्रं राणायनिं[4] दुर्वाससं[5] च भागुरिं[6] गौरुण्डिं[7] गौर्गुलविं[8] भगवन्तमौपमन्यवं कारडिं[9] सावर्णिं[9] गार्ग्यं वार्षगण्यं दैवन्त्यमित्येतांस्त्रयोदश[10] ' धानावन्तं दधिक्राव्णा[11] इत्येताभ्यामभिमन्त्र्य हविःशेषं प्राश्य प्राह्णे प्रधीयत[12] ' आग्नेये समाप्ते ऽज ऐन्द्रे मेषो गौः पावमाने पर्वदक्षिणा ' सब्रह्मचारिणश्चोपसमेतान्भोजयेत्सावित्रमहः[13] काण्डे ' उत्सर्गे च ' पक्षिणीं रात्रिं न मांसमश्नीयान्न श्राद्धं ' न लोमानि संहारयेन्न स्त्रियमुपेयादृतौ जायामुपेयाद्वर्षाशरदिकमेतद्व्रतमर्धमासमित्येके[14] ' ॥ १४ ॥

---

१ प्राणानायम्याचम्य M[1]; प्राणायामानाचम्याचम्य M[2]; प्राणायामानाचम्य B.

२ प्रंनोऽस्तु M[2].

३ Het volgende tot aan 't eind van den khaṇḍa ontbr. in M[2]. आचार्य आचार्य च M[1].

४ आणायनिं B; राणायिणीं M[1].

५ कुरुवाससं B; दुर्वासस of दुर्वासस M[1], vgl. Simon, Beitr. zur Kenntnis der Vedischen Schulen, S. 28, noot.

६ भागुरं M[1].

७ गौरिणिडं B, गौरणिडं M[1].

८ गौड्डुलवं B; गौर्गिलवं M[1].

९ Zoo B, doch met Tamil-Malayalam *l*, i. p. v. de *ḍ*; गार्ग्य° M[1].

१० Zoo B; दैवन्तम् M[1].

११ दधिक्राव्णामित्ये° B.

१२ प्राधीयत M[1].

१३ सावित्रेण° de HSS.

१४ वर्षाशर° M[1].

तेषामुत्सर्गो ' वेदेषु यथास्वं विश्रमन्तां छन्दांसि चतुरुत्तराणि शिवेन नो ध्यायन्त्वित्युत्सृज्याध्यायानध्यायौ व्रतानि चानुपालयन्तो यथास्वं वेदमधीयीरन्नत ऊर्ध्वमभ्रेषु नाधीयते ' ॥ १५ ॥

गौदानिकव्रातिकौपनिषदाः[1] संवत्सरास्तेषु सायंप्रातरुदकोपस्पर्शनं ' नानुपस्पृश्य भोजनं प्रातः ' सायमुपस्पृश्य समिदाधानादरण्यात्समिधमाहृत्यादध्यादादित्यव्रातिकः संवत्सर ' एकवासा ' न युक्तमारोहेदादित्यं नान्तर्दधीत छत्त्रेण ' महीमासनशयनाभ्यामुपानह्यां[2] च[2] ' नोर्ध्वं जान्वोरपः प्रस्नायादन्यत्राचार्यवचनाद्व्रातिके व्रतपर्वादित्यव्रातिके[3] शुक्रियाण्यौपनिषद उपनिषदं श्रावयेत् ' ॥ १६ ॥

द्वादश महानाम्निकाः[4] संवत्सरा नव षट् त्रय इति विकल्पाः ' संवत्सरमित्येके[5] पित्रा चेच्छ्रुता महानाम्न्यः[6] ' संवत्सरं ब्रह्मचर्यं चरेच्छुक्लैकवासा ' व्रतं तु भूयस्तिष्ठेद्दिवायासीत नक्तं ' तस्य कृष्णे भोजनाच्छादने भवत इत्येके शुक्लं चैव[7] परिदध्याद्रागदोषान्न कृष्णां ' सर्वास्वप्सूपस्पृशेदयुक्ताः[8] शक्वर्य इति ' नावा न प्रस्नायात्प्राणसंशये तूपस्पृशेद्भयत[9] ' अपि वा गाः पाययेत्यशूक्ताः शक्वर्य इति ' वर्षे नान्तर्दधीत छत्त्रेण प्रति वर्षं निष्क्रामेदेवमस्य चरतः कामवर्षी पर्जन्यो भवति ' ब्रह्मचर्यान्त एकरात्रमुपोषित ' अरण्यं गत्वा शैवलमिश्राणामपां कांसं पूरयित्वा तमुपवेश्य समनुपरिगृह्य निमीलितं तिस्र स्तोत्रिया उपगायेत्सपुरीषा[10] ' उपोत्थायाचार्यो ऽहतेन वाससा मुखमस्य परिणह्येत्प्रदक्षिणमुदपात्रं धारयंस्तिष्ठेदहःशेषं ' रात्रिमासीत

---

1 Zoo B, $M^2$; गोदा° $M^1$. 2 उपनह्यां च om. $M^1$. 3 व्रातिके B, $M^2$; व्रातिकस् $M^1$. 4 °नाम्नीकाः B, $M^2$. 5 °त्सर इत्येके B, $M^2$. 6 °नाम्न्यः de HSS. 7 चैव $M^1$; तेव (sic) B; $M^2$ om. de woorden शुक्लं … दध्यात्.
8 Zoo slechts B; आपूक्ता $M^1$; अभुक्ता $M^2$. 9 B ins. इति na °स्पृशेद्.
10 Zoo alle (उपगायेत् $M^1$); daar de comm. उपगायेत् door अध्यापयेत् verklaart, moet men wel उपगापयेत् verbeteren.

वाग्यतः 'श्वो भूते ऽरण्यं गत्वाग्निमुपसमाधाय वत्समुपान्वानीय[1] 'वास उद्वेष्टयेदुत्क्रम्य कांसमपो ऽभिवीक्ष इति वीक्षेत्स्वरभिवीक्ष इत्यादित्यं 'ज्योतिरभिवीक्ष इत्यग्निं 'पशुमभिवीक्ष इति वत्सं 'समन्या यन्तीत्यपः प्रसिच्य वासः कांसं वत्समित्याचार्यायोपहरेत्स्थालीपाकादिश्वामित्रेन्द्रौ महानाम्नीश्च यजत इत्याचार्यं सपरिषत्कं भोजयेद्गौर्दक्षिणा ' ॥ १७ ॥

द्वादश वर्षाणि वेदब्रह्मचर्यं[2] 'जननात्प्रभृतीत्येके 'यावदध्ययनं वा 'सदा सायं[3] समिदाधानं 'सायंप्रातर्भैक्षचरणं 'द्वे त्रिवृती वर्जयित्त्रिवृतं च मणिं त्रिगुणे[4] चोपानहौ 'षोडशे गोदानकरणं 'तत्केशान्तकरणमित्याचक्षते 'चौडकरणेन मन्त्रा व्याख्याताः[5] 'उपनयनेन व्रतादेशनं 'न विहृ नियुक्तमहतं वासः 'सर्वाणि लोमनखानि वापयेच्छिखावर्जमित्यौद्गाहमानिरुप्तकेशः स्नायाद्वनस्पतेरिति वनस्पतीनां स्नानीयेन त्वचमुन्मृद्गीते[6] 'वनस्पतेस्त्वगसि शोधनि शोधय मा तां त्वाभिहरे दीर्घायुत्वाय वर्चस इति 'वनस्पतीनां गन्धो ऽसीति स्नात्वानुलेपनेन कुरुते 'वनस्पतीनां गन्धो ऽसि पुण्यगन्ध पुण्यं मे गन्धं कुरु देवमनुष्येषु तं त्वाभिहरे दीर्घायुत्वाय वर्चस इति 'वनस्पतीनां पुष्पमसीति स्रजमाबध्नीते 'वनस्पतीनां पुष्पमसि पुण्यगन्ध पुण्यं मे गन्धं कुरु देवमनुष्येषु तं त्वाभिहरे दीर्घायुत्वाय वर्चस इत्यादर्शो ऽसीत्यादर्श आत्मानं वीक्षेतादर्शो[7] ऽस्या मा दृश्यासन्देवमनुष्या उभये शोभो ऽसि शोभासमहं देवमनुष्येषु रोचो ऽसि

---

१ Zoo B; उपन्वनीय $M^1$; उपन्वानीय $M^2$.
२ चरेत् ins. $M^1$.
३ Zoo B $M^1$; सादासाये $M^2$.
४ Zoo B; त्रिगुणा $M^1$; त्रिगुणो $M^2$.
५ Zoo $M^1$; °करणेनमन्तृव्याख्यातं $M^2$; °करणेनव्याख्यातं B.
६ त्वन्मृद्नीते B; उन्मृध्नीते $M^2$; उन्मृत्नीयते $M^1$.
७ Zoo B $M^2$; अवेक्षेत $M^1$.

रोचासमहं देवमनुष्येष्वित्यपोद्धृत्य स्वजमादिशयेतोक्ता[१] धर्माः संवत्सरेषु ' गौर्दक्षिणा ' ॥ १८ ॥

वेदमधीत्य व्रतानि चरित्वा ब्राह्मणः स्नास्यन्संभारानुपकल्पयते ऽहतं वास एरकां स्नानमनुलेपनं सुमनस आञ्जनमादर्शमहते वाससी त्रिवृतं मणिं वैणवं दण्डं शुक्ले उपानहौ ' नापित उपक्लृप्त उत्तरत उपतिष्ठत्येरकामास्तीर्याहतेन वाससोदग्दशेन प्रच्छाद्य तत्रैनं प्राङ्मुखमुपवेश्य दण्डमप्सु पादयेद्विषतां[२] वज्रो ऽसीति ' मेखलां विस्रंसयेदुदुत्तममिति ' तां चैवाप्सु पादयेत्केशान्तकरणेन मन्त्रा व्याख्याताः ' परिवापनं च ' शिरो ऽग्रे वपते[३] ततः श्मश्रूणि तत इतराण्यङ्गान्यनुपूर्वेण[४] ' केशश्मश्रुलोमनखान्यश्वत्थस्य मूले निखनेदुदुम्बरस्य[५] वापहतो मे पाप्मेति ' शीतोष्णाभिरद्भिर्हिरण्यान्तर्हिताभिरेनं स्नापयेच्छिवा नः शंतमा भव सुमृडीका सरस्वति मा ते व्योम संदृशीति ' रोहिण्यां स्नायात्प्रजापतेर्वा एतन्नक्षत्रं ' प्रजावान्भूयासमिति ' मृगशिरसि स्नायात्सोमस्य वा एतन्नक्षत्रं ' सोमिज्या मोपनमेदिति ' तिष्ये स्नायाद्बृहस्पतेर्वा एतन्नक्षत्रं ' ब्रह्म बृहस्पतिर्ब्रह्मवर्चसी भूयासमिति ' हस्ते स्नायात्सवितुर्वा एतन्नक्षत्रं ' सवितृप्रसूतो भूयासमित्यनूराधासु स्नायान्मित्रस्य वा एतन्नक्षत्रं ' मित्राणां प्रियो भूयासमिति ' श्रवणे स्नायाद्विष्णोर्वा एतन्नक्षत्रं ' यज्ञो वै विष्णुर्यज्ञो मोपनमेदिति ' तमहतेन वाससा परिदधात परीमं सोमेति ' सव्यमग्रे ऽभ्यञ्जीत यशसा मेत्यथ[६] दक्षिणं ' त्रिवृतं मणिं कण्ठे प्रतिमुञ्चते ' पालाशं स्वस्त्ययनकामः स्वस्त्ययनो ऽसीति ' बैल्वं ब्रह्मवर्चसकामो ब्रह्मवर्चसी

---

१ आदेशयत B; आदेशयेति $M^2$ (आदेशयेत comm.); आदेशयते $M^1$.

२ द्विषतो $M^1$. ३ वपेत $M^1$.

४ Zoo B; आनुपूर्व्येण $M^2$; आनुपूर्वेण $M^1$. ५ औदुम्बरस्य alle.

६ यशसेतिश्च B; यशसासेतिश्च $M^1$; यशसीमेतिश्च $M^2$.

भूयासमित्यर्कमन्नाद्यकामो ऽर्कवानन्नादो भूयासमिति ' गन्धर्वो ऽसि विश्वावसुः स मा पाहि स मा गोपायेति वैणवं दण्डमुपादत्त ' उपानहावादधीत [१] नेत्रे स्थो नयतं मामिति ' दक्षिणमग्रे प्रतिमुञ्चते ' तस्य व्रतानि भवन्ति ' नाजातलोम्न्योपहासमिच्छेदर्पयति न धावेन्नोपानहौ स्वयं हरेन्न फलानि स्वयं प्रचिन्वीत ' न प्रतिसायं ग्रामान्तरं व्रजेन्नैको ' न वृषलैः सह ' नोदपानमवेक्षेत न वृक्षमारोहेन्न संक्रममारोहेन्नानन्तर्धायासीत ' नापरया द्वारा प्रपन्नमन्नमश्नीयान्न शुक्तं ' न द्विःपक्वं ' न पर्युषितमन्यत्र शाकमांसयवपिष्टान्नपृथुकफाणितदधिमधुघृतेभ्यो [२] ' नानर्माणि हसेन्न नग्नः स्नायाच्छुक्ला वाचो न भाषेत ' जनवादं कलहांश्च वर्जयेच्चैवं स्नातका भवन्तीति ह [३] स्माहारुणिगौतमो [३] विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातक इति ' तेषामुत्तमः श्रेष्ठस्तुल्यौ पूर्वौ ' स्नात्वाचार्यं [४]ब्रूयान्मधुपर्कं मे भवानानयत्वित्याचार्यकल्पो वा ' तस्मै प्राङ्मुखायासीनाय मधुपर्कमाहरेद्विष्टरपाद्यार्घ्याचमनीयान्येकैकमनुपूर्वेण [५] ' विष्टरमध्यास्ते ' पाद्येन पादौ प्रक्षालयते मयि श्रीः श्रयतामिति [६] ' सव्यं पादमग्रे शूद्रा चेन्मयि पद्या [७] विराडित्यथ [७] दक्षिणं ' मयि वर्च इत्यर्घ्यं प्रतिगृह्णीयादाचमनीयाभिराचामेत् [८] ' पात्रचमसं विष्टरोपहितमधस्ताद्विष्टरौ संहितायौ भवत ' एकविष्टर उत्तरतस्तयोर्मध्ये दधि मधु संनिहिते भवतो ' दध्ना चेद्दधिमन्थो ' ऽद्भिश्चेदुदमन्थः ' पयसा चेत्पयस्यस्तं प्रतिगृह्णीयाद्देवस्य त्वेति ' तं प्रतिगृह्य [९] भूमौ प्रतिष्ठाप्यावघ्र्याङ्गुष्ठेनोपकनिष्ठिकया च मध्यं

---

१ Zoo $M^1$ $M^2$; आददीत B. २ °फाणित° $M^2$; °पाणित° B; °पाणि° $M^1$.

३ Zoo B (slechts °रुणिगौत°); इति ह स्याहारुणिगौत° $M^1$; इति अस्माहरुणिर्गौत° $M^2$.

४ प्रब्रूयात् B. ५ Zoo $M^1$; आनुपूर्व्येण B; आनुपूर्व्येण $M^2$. ६ Zoo $M^2$; श्रिय° M; श्रीय° B. ७ Zoo B; विराविरा इति $M^1$; विपद्याविराडिति $M^2$.

८ Zoo B; आचमेत् $M^2$; °चामयेत् $M^1$.

९ Zoo $M^1$; B $M^2$: तं प्रतिगृह्य देवस्य त्वेति त्रिः प्रभृती

त्वा यशसे श्रियै ऽन्नाद्याय ब्रह्मवर्चसायेति त्रिः प्राश्नीयाच्छेषमुत्तरतः प्रतिगृह्य[1] ब्राह्मणाय दद्याद्भुक्त्वा वाब्राह्मणाय गर्ते वा निखनेत्परः स्वधितिपाणिर्गां दद्याद्गौर्गौरिति[2] तामभिमन्त्रयते गौर्धेनुरित्योमुत्सृजतेति ब्रूयात्कर्तव्या चेत्कुरुतेति ब्रूयाद्गौर्धेनुर्भव्या[3] माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः । प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट पिबतूदकं तृणान्यत्त्वित्यथ[4] षडर्घ्यार्हा भवन्त्यृत्विगाचार्यः स्नातको राजाभिषिक्तः प्रियः सखा श्रोत्रियश्चेति तेभ्य आतिथ्यं गां कुर्यात्तामतिथय इति प्रोक्षेत् ॥ १९ ॥

स्नात्वा मातापितरौ परिचरेत्तदधीनः स्यात्ताभ्यामनुज्ञातो जायां विन्देतानग्निकां समानजातीयामसगोत्रां मातुरसपिण्डां ज्यायसः कनीयसीं दूतमनुमन्त्रयते ऽनृक्षरा ऋजवः सन्तु पन्था एभिः[5] सखायो यन्ति नो वरेयम् । समर्यमा सं भगो नो ऽनुनीयात्सं[6] जास्पत्यं सुयममस्तु देवा इति पाणिग्रहणे ऽग्निमाह्रियमाणमनुमन्त्रयते[7] ऽग्निरैतु प्रथमो देवतानां सो ऽस्यै प्रजां मुञ्चतु मृत्युपाशात् । तदयं राजा वरुणो ऽनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदादिति प्रज्वलितमुपतिष्ठत इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः । अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभि प्रबुध्यतामियमिति पुरस्तादग्नेर्ब्राह्मणो वाग्यतः प्रत्यङ्मुख उदकुम्भं धारयंस्तिष्ठेद्दक्षिणतो ऽग्नेः शमीपलाशमिश्रांल्लाजाञ्छूर्पे माता धारयेन्मातुरभावे तन्मात्री प्रत्यगग्नेरेरकां तेजनीं[8] वान्यद्वैवंजातीयं[9] संवेष्ट्य निदध्यात्तया

---

1 परिगृह्य M². 2 Driemaal गौर् M¹. 3 Zoo B M¹ (vgl. comm.); भव्या M². 4 Na इति (dat in B M² ontbr.) heeft M¹ nog: ओमुत्सृजेत् तामुत्सृजेत्. 5 Zoo alle (i. p. v. येभिः), ook comm. 6 Zoo alle (i. p. v. निनीयात्), ook comm. 7 °ह्रियमाण° M¹ B; °हार्यमाण° M². 8 Zoo B; तेजनं M²; तेजनीयं M¹. 9 वा अन्यद्देवजा° M¹.

प्रसार्यमाणां[1] पश्चार्धे बर्हिषः प्राग्रोत्यथास्यै[2] वाससी प्रोक्ष्यानुमन्त्र्य ददाति[3] या अकृन्तन्नवयन्या अतन्वत याश्च देवीरन्तानभितो ऽददन्त । तास्त्वा देवीर्जरसा संव्ययन्त्वायुष्मतीदं परिधत्स्व वास इति' तां ब्रूयादिमामेरकां दक्षिणेन पदेनाभिक्रमेति' प्र मे पतियानः पन्थाः कल्पतामित्यजपत्यां[4] स्वयं जपेत्प्रास्या इति' दक्षिणत एरकायां भार्यामुपवेश्योत्तरतः पतिरुभावन्वारभेयातां' स्वयमुच्चैर्जुहुयाज्जायायामन्वारब्धायां' महाव्याहृतिभिर्हुत्वा या तिरश्चीति सप्तभिर्जुहोति' संपातं प्रथमया मूर्धन्यासिञ्चेद्या[5] तिरश्ची निपद्यसे ऽहं विधरणी इति । तां त्वा घृतस्य धारया संराधा राधयामसि संराधयै स्वाहा ॥ मा ते गृहे निशि घोष उत्थादन्यत्र त्वद्रुदत्यः संविशन्तु । मा त्वं विकेश्युर आवधिष्ठा जीवपत्नी पतिलोके विराज प्रजां पश्यन्ती सुमनस्यमाना स्वाहा ॥ अन्वद्य नो ऽनुमतिर्यज्ञं देवेषु मन्यताम् । अग्निश्च हव्यवाहनस्तत्करोतु समृध्यतां स्वाहा ॥ द्यौस्ते पृष्ठं रक्षतु वायुरूरू अश्विनौ च स्तनं धयतस्ते पुत्रान्सविताभिरक्षतु । आ वाससः परिधानाद्बृहस्पतिर्विश्वे देवा अभिरक्षन्तु पश्चात्स्वाहा ॥ अप्रजस्तां पौत्रमृत्युं[6] पाप्मानमुत वाघम् । शीर्ष्णः[7] स्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुञ्चामि पाशं स्वाहा ॥ यानि कानि च पापानि सर्वाङ्गेषु तवाभवन् । पूर्णाहुतिभिराज्यस्य सर्वाणि तान्यशीशमं स्वाहा ॥ प्रजापत इत्येका' ॥ २० ॥

अथास्या दक्षिणेन पाणिना दक्षिणं पाणिं गृह्णाति' प्रहस्तं पुंस'

---

१ °माणा: $M^1$.  २ Voor अथ $M^1$ ins. इति.  ३ दधाति $M^1$ $M^2$.

४ Zoo B; कल्प्यतामित्य° $M^2$; कल्प्यतमियमित्य° $M^1$.

५ Zoo $M^2$; मूर्ध्न्यासि° B; मूर्ध्नासि° $M^1$.

६ Zoo B $M^2$; पौत्रं मृत्युं $M^1$.

७ Zonder visarga B $M^2$; शीर्ष्णि $M^1$.

अङ्गुली स्त्रियः' साङ्गुष्ठं मिथुनकामो[1]' गृह्णामि[2] ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासत् । भगो ऽर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥ सोमो ऽददद्गन्धर्वाय गन्धर्वो ऽददग्नये । रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम् ॥ सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः । तृतीयो ऽग्निष्टे पतिस्तुरीयो[3] ऽहं मनुष्यजा इत्युपनयनावृताश्मानमधिष्ठापयेत्स्त्रीवत्[4]' उत्तरपुरस्तादग्नेर्भार्यया संप्रेक्ष्यमाणो जपत्यघोरचक्षुरपतिघ्नी म[5] एधि शिवा पतिभ्यः[6] सुमनाः सुवर्चाः । जीवसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥ आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा । अदुर्मङ्गलीः पतिलोकमाविश शं न[7] एधि[7] द्विपदे शं चतुष्पदे ॥ तां पूषञ्छिवतमामेरयस्व यस्यां बीजं मनुष्या वपन्ति । या न ऊरू उशती विस्रयाति यस्यामुशन्तः प्रहरेम शेफम् ॥ अमो ऽहमस्मि सा त्वं सामाहमस्म्यृक्त्वं मनो ऽहमस्मि वाक्त्वं द्यौरहं पृथिवी त्वं तावेहि संभवाव सह रेतो दधावहै पुंसे पुत्राय वेत्तवै मामनुव्रता भव सहशय्या मया भवासावित्यथास्या नाम गृहीत्वाग्निं परिक्रमेयातामीर्त्वमस्यूर्जो माता नाम सा मामेहि सह प्रजया सह रायस्पोषेणेति' तस्यां प्रत्याव्रजितायां भ्रातान्यो वा सुहृदभिघारितान्लाजान्शूर्पादञ्जलिनोपघातमञ्जलावावपेदुपस्तीर्णाभिघारितान्कृत्वा तानितराग्नौ जुहुयात्कन्यलेयं नार्यर्यमणामिति' कन्यला पितृभ्यः पतिलोकं यतीयमव दीक्षामयक्षत स्वाहा ॥ इयं नार्युपब्रूते ऽग्नौ

---

1 Hier volgen in $M^1$ de in B $M^2$ ontbrekende en in den comm. niet vermelde woorden: गध्यमां परिव्रजेयित् 2 Zoo B $M^2$; गृभ्णामि $M^1$.

3 तुरियो B; तुर्यो $M^1$ $M^2$. 4 $M^1$ laat hier de spreuk इममश्मानम् met ūha volgen. 5 Zoo $M^2$; °घ्नीमयेधि B; °घ्नीमेति $M^1$. 6 पत्युभ्यः alle tekst-MSS.; de comm. leest echter पतिभ्यः 7 Zoo B; नयेति $M^1$; नो भव $M^2$.

लाजानावपन्ती । दीर्घायुरस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा ॥ अर्यमणं नु देवं कन्याग्निमयक्षत । स इमां देवो अर्यमा प्रेतो मुञ्चातु मामुतः स्वाहेति होमान्तेषु जपति चतुर्विंश्या उत वया वयं धारा उदन्या इव । अतिगाहेमहि द्विष इति तूष्णीं धारिका कामाया-वपेच्चतुर्थं दक्षिणं शूर्पपुटं काम इत्याचक्षत उत्तरपुरस्तादग्नेः सप्त पदान्यभ्युत्क्रमयेदेकमिष इति प्रतिमन्त्रमेकमिषे विष्णुस्त्वान्वेतु । द्वे ऊर्जे विष्णुस्त्वान्वेतु । त्रीणि रायस्पोषाय विष्णुस्त्वान्वेतु । चत्वारि मयोभवाय विष्णुस्त्वान्वेतु । पञ्च प्रजाभ्यो विष्णुस्त्वान्वेतु । षडृतुभ्यो विष्णुस्त्वान्वेतु । सखा सप्तपदी भवेति सप्तमे प्राचीमवस्थाप्योदकुम्भेन मार्जयेरन्नापोहिष्ठीयाभिस्तिसृभिः प्रेक्षकाननुमन्त्रयते सुमङ्गलीरियं वधूरिमां समेत पश्यत । सौभाग्यमस्यै दत्त्वायाथास्तं विपरेतनेति प्रेक्षयेद्ध्रुवमरुन्धतीं सप्त ऋषीन्पश्यामीति प्रतिजानानां ध्रुवो ऽसीति ध्रुवमुपतिष्ठते ध्रुवो ऽसि ध्रुवाहं पतिकुले भूयासममुष्येति पतिनाम गृह्णीयादसावित्यात्मनो ऽरुन्धतीमरुन्धत्यरुद्धाहं[1] पत्या भूयासममुनेति पतिनाम गृह्णीयादसावित्यात्मनः ॥ २१ ॥

पूषा वेत इति प्रस्थितामनुमन्त्रयते पूषा वेतो नयतु हस्तगृह्याश्विनौ त्वा प्रवहतां रथेन । गृहान्गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमावदासीति स्वं कुलं प्राप्तां कल्याणशीलाः कल्याणप्रजाः समवजीर्णाः प्रत्यवरोपयन्तीह प्रियं प्रजया ते समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि । एना पत्या तन्वं संमृजस्वाथाजीव्री विदथमावदासीति प्रत्यवरोप्यानडुहे चर्मण्युत्तरलोमन्युपवेशयेदिह[2] गावो निषीदन्त्विहाश्वा इह पुरुषाः । इहो सहस्रदक्षिणो ऽभि[3] पूषा

---

१ Na अरुन्धतीम्; B ins.: दृष्ट्वा उपतिष्ठते अरुन्धतीति. २ Zoo $M^1$ $M^2$; °लोमन्युप° B. ३ Zoo B; °दक्षिणा अभि $M^1$; °दक्षिणोऽपि $M^2$.

निषीदविति ' कुमारमुपस्थ आधाय शकलोटानावपेत्फलानि वोत्थाप्य कुमारमन्वारब्धायां जुहुयादिह धृतिरित्यष्टाभिः[1] स्वाहाकारान्तैरिह धृतिरिह स्वधृतिरिह रन्तिरिह रमस्व । मयि धृतिर्मयि स्वधृतिर्मयि रमो मयि रमस्वेति[2] ' त्रिरात्रमक्षारालवणाशिनौ[3] ब्रह्मचारिणावधःसंवेशिनावसंवर्तमानौ[4] सह शयातामूर्ध्वं त्रिरात्रात्संभवो[5] ' निशायां जायापतिकर्मण्यं ' प्रायश्चित्तीर्जुहुयादग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै प्रजाघ्नी तनूस्तामस्या अपजहि स्वाहा । वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पशुघ्नी तनूस्तामस्या अपजहि स्वाहा । सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पतिघ्नी तनूस्तामस्या अपजहि स्वाहा । चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै गृहघ्नी तनूस्तामस्या अपजहि स्वाहा । अग्ने वायो सूर्य चन्द्र प्रायश्चित्तयो यूयं देवानां प्रायश्चित्तय स्थ ब्राह्मणो वो नाथकाम उपधावामि यास्यै यशोघ्नी तनूस्तामस्या अपहत स्वाहेति ' स्थालीपाकादग्निं प्रजापतिं चेष्ट्वा संपातांश्चमस आनीय स्नातांस्याङ्क्त्वेनां[6] ब्रूयान्नाभिं प्रथमं ' ततो यान्यूर्ध्वं ' ततो यान्यर्वाञ्च्यूर्ध्वमर्धरात्रात्संवेशनं विष्णुर्योनिं कल्पयत्वित्येतेन[7] तृचेन[7] ' विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु । आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥ गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति । गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ हिरण्ययी अरणी यं निर्मन्थतामश्विनौ । तं ते गर्भं दधाम्यहं दशमे

---

१ Zoo $M^1$ $M^2$; इत्येताभि B. २ Voor इति M ins. स्वाहा. ३ Zoo B; अक्षारलवणा° $M^1$ $M^2$. ४ Zoo B; अवस्संवर्त° $M^1$; $M^2$ defect. ५ संभवतः B. ६ अङ्क्त्वेति B. ७ विष्णु° . . . तृचेन om. $M^1$.

मासि सूतवा[1] इत्यृतावृतावेवमेव संवेशने[2] हुत्वाचार्याय गां दद्यादर्शने[3] ब्राह्मणेभ्यो गां दद्यात् ॥ २२ ॥

सायंप्रातर्होमे ऽग्नय इति प्रथमामाहुतिं जुहोति प्रजापतय इत्युत्तरामेवं प्रातरग्निस्थाने सूर्यः सायंप्रातरशनस्य बली वर्धयित्वा पूर्वस्मादग्नौ जुहोत्यग्नये स्वाहा सोमाय स्वाहा धन्वन्तरये[4] स्वाहा द्यावापृथिवीभ्यां स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा सर्वाभ्यो देवताभ्यः स्वाहा प्रजापतये स्वाहेति मनसोत्तरां तत एवोत्तरतो ऽग्नेर्बलिं[5] हरति[5] ये हर्वणा वेपना स्फातिमाहरा वातस्य भ्राजमनुसंचरन्ति । तेभ्यो बलिमन्नकामो हराम्यन्नं पयस्वद्बहुलं मे अस्त्वित्येवमशनायत्यायस्थाने[6] मृत्योरधिष्ठानाय स्वाहेति शेषस्य बलिहरणं प्रदक्षिणं गृह्याभ्यो देवताभ्यो बलिं नयामि तन्मे जुषन्तां ता मा पान्तु ता मा गोपायन्तु ता मा रक्षन्तु ताभ्यो नमस्ताभ्यः स्वाहेत्युदधाने मध्ये ऽगारस्योत्तरपूर्वार्धे शयने देहल्यां[7] संवरणे ब्रह्मायतन[8] एतेष्वायतनेषु[8] शेषं धन्वन्तरये निनयेत्सदा गृहेषु स्वस्तिवाचनं सा महाशान्तिरित्याचक्षते ॥ २३ ॥

नवेन यक्ष्यमाणः पुराणेनाग्रे यजेताग्निधन्वन्तरी प्रजापतिमिन्द्रं तिस्रश्च नवाहुतीर्नवेन यजेत शरदि व्रीहीणां वसन्ते यवानां वर्षासु श्यामाकानामैन्द्राग्नो वैश्वदेवो द्यावापृथिव्यश्चरव एकचरुर्वाहि एवोपस्तरणाभिघारणे द्विर्हविषो ऽवद्यत्यथ प्राश्नीयाद्भद्रान्नः श्रेयः समनैष्ट देवास्त्वयावसेन समशीमहि त्वा । स नो मयोभूः पितो

---

[1] Zoo M²; सूतवै (इति) B; सूतवाद (इति) M¹. [2] Zoo B M¹; °शनं M². [3] Zoo B; आदर्शने M¹ M². [4] °न्तरे de HSS. [5] Zoo slechts M²; बलीनाहरति B; बलीन् हरति M¹. [6] Zoo M¹ M²; आयु° B. [7] देहिल्यां B; देहिल्यां M¹; देवहूयां M². [8] ब्रह्मायनेषु एतेषु° M¹; ब्रह्मायतनेषु नेषु° M²; ब्राह्मणायतने एतेषु° B.

आविशस्व शं तोकाय तनुवे स्योन इत्येतमु त्वं मधुना संयुतं यवं सरस्वत्या अधि मनावचर्कृषुः[1] । इन्द्र आसीत्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानव इति यवस्य प्राश्नीयादग्निः प्रथमः प्राश्नातु स हि वेद यथा हविः । शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणीरिति श्यामाकस्य प्राश्नीयात्प्राश्नीयात्[2] ॥ २४ ॥

## ॥ इति जैमिनिसूत्रं पूर्वम् ॥

श्राद्धं करिष्यन्तः स्नाताः शुचिवाससस्तिलैर्वास्त्ववकीर्य[3] सव्यमाचरन्तो ऽन्नमुपसाधयेरन्हविष्यैरुपसिच्यैवं दद्याद्यद्यद्द्यात्तत्तद्धविष्यैरुपसिच्यैव हविष्या इति तिलानामाख्या दन्तधावनं स्नानीयानि पाद्यमानीय प्रथमोद्धृतं ब्राह्मणांस्त्यवदातानुपवेशयन्त्या मे गच्छन्तु पितरो भागधेयं विराजाक्रान्ताः[4] सलिलात्समुद्रियात्[5] । अन्नीयमाणमुपजीवन्तैनन्मया प्रत्तं स्वधया मदध्वमित्युपमूललूनान्दर्भान्विष्टरान्प्रसव्यान्कृत्वा ब्राह्मणेभ्यः प्रदद्यादेतत्ते पितरासनमसौ ये च त्वात्रानु तेभ्यश्चासनमित्येवं पितामहायैवं प्रपितामहाय हविष्योदकं तिरः पवित्रं गन्धान्सुमनसश्च दद्यादन्नमवत्त्वा घृतेनाभिघार्य दर्भान्परिस्तरणीयानिति[6] तदादायाग्नौ करिष्यामीति ब्राह्मणाननुज्ञाप्य प्राग्दक्षिणामुखो ऽग्निं प्रणयित्वा त्रिर्धून्वन्प्रदक्षिणमग्निं[7] परिस्तृणाति प्राचीनावीती त्रिः प्रसव्यं त्रिः पर्युक्षेत्प्रदक्षिणं प्राचीनावीती त्रिः प्रसव्यमौदुम्बर इध्मः परिधयो भवन्ति मेक्षणं च पवित्रं संस्कृत्या-

---

1 °वचक्रिषुः M²; °विचक्रिषुः B; M¹ defect. 2 De herhaling volgens den comm.; zij wordt niet in de HSS. gevonden. 3 Zoo M²; अवकीर्य B M¹.
4 °द्धुताः MSS. 5 Zoo M² en comm.; समृयात् M¹; समुद्रात् B.
6 Zoo M¹; B M²: °स्तरणीयानीति 7 धुन्वन् B (comm.: धून्वन्).

त्रमुत्पूयाग्नौ पवित्रं प्रास्य मेक्षणेन जुहोत्यग्नये कव्यवाहनाय स्वधा नमः स्वाहा सोमाय पितृमते स्वधा नम स्वाहेति ' यज्ञोपवीती भूत्वाप उपस्पृश्य यमायाङ्गिरस्वते स्वाहेति मेक्षणमग्नावनुप्रहरति ' नमस्कारान्कृत्वा यथादैवतं त्रिः पर्युक्षेत्प्रदक्षिणं प्राचीनावीती त्रिः प्रसव्यं ' सव्यञ्जनमन्नं पात्रेषु वर्धयित्वामासु पक्वमिति क्षीरं घृतं वासिञ्चत्यामासु पक्वममृतं निविष्टं मया प्रत्तं स्वधया मदध्वमिति ' वर्धितान्यादिशत्येतद्वः[1] पितरो भागधेयं पात्रेषु दत्तममृतं स्वधावत् । अक्षीयमाणमुपजीवतैनन्मया प्रत्तं स्वधया मदध्वम् ॥ अमृता वागमृता वाचो अग्ने वाचो ऽमृत[2] त्वं त्रिवृतैकधामा[3] । एभिर्मत्प्रत्तैः स्वधया मदध्वमिहास्मभ्यं वसीयो ऽस्तु देवाः ॥ अयं यज्ञः परमो यः[4] पितॄणां पात्रेदेयं पितृदैवत्यमग्ने । वाक्च मनश्च पितरो नः प्रजानीमाश्विभ्यां प्रत्तं स्वधया मदध्वम् ॥ य इह पितरः पार्थिवासो य अन्तरिक्ष[5] उत ये समुद्रियाः[6] । ये वाचमाप्त्वा अमृता बभूवुस्ते[7] ऽस्मिन्सर्वे[7] हविषि मादयन्ताम् ॥ एषा व ऊर्गेषा वः स्वधा चामत्त च पिबत च मा च वः[8] क्षेष्ट । स्वधां वहध्वममृतस्य योनिं यात्र स्वधा पितरस्तां भजध्वम् ॥ येह पितर ऊर्जवता च तस्यै जीवेम शरदः शतं वयम् । ज्योतिष्मद्दत्ताजरं म आयुरित्येतानि ब्राह्मणेभ्य उपनिक्षिप्य स्वाङ्गुष्ठेनानुदिशत्यमुष्मै[9] स्वधामुष्मै स्वधेति ' यन्मे ऽप्रकामा इति भुञ्जतो ऽनुमन्त्रयते ' यन्मे ऽप्रकामा उत वा प्रकामा समृद्धे[10] ब्राह्मणे ऽब्राह्मणे वा । य स्कन्दति निर्ऋतिं वात उग्रां येन नः प्रीयन्ते

---

१ In B M$^{2}$ worden eerst alle mantras gegeven en dan volgen de woorden व° आदि°.
२ मृतत्वं B; अमृतत्वं M$^{1}$ (M$^{2}$ defect).
३ त्रिविधैक° M; त्रिवृदेक° B (M$^{2}$ defect).
४ यं de MSS.
५ Zoo B; आन्तरिक्षा M$^{1}$; अन्तरिक्षौ M$^{2}$.
६ समुद्रयाः M$^{2}$; समृद्धया M$^{1}$; समुद्राः B.
७ Zoo M$^{2}$; ते अस्मि° M$^{1}$; तस्मि° B.
८ माचवक्षेष्ट M$^{2}$; मावक्षेष्ट B; माधवक्षेषु M$^{1}$.
९ ब्राह्मणस्यांगुष्ठेन M$^{1}$.
१० Zoo B; समृद्धे M$^{2}$; समृध्यै M$^{1}$.

पितरो देवताश्च । वायुष्टत्सर्वं शुन्धतु तेन शुद्धेन देवता मादयन्तां तस्मिञ्छुद्धे पितरो मादयन्तामित्यंक्रान्समुद्र इत्याद्यं गीत्वा संपन्नं पृष्ट्वाथाचामयेद्यज्ञोपवीती[1] भूत्वाभिरमन्तां[2] भवन्त इत्युक्त्वा प्रदक्षिणं कृत्वा यन्मे रामेति गच्छतो ऽनुमन्त्रयते यन्मे रामा शकुनिः श्वापदश्च यन्मे ऽशुचिर्मन्त्रकृतस्य प्राशत् । वैश्वानरः सविता तत्पुनातु तेन पूतेन देवता मादयन्तां तस्मिन्पूते पितरो मादयन्तामिति ॥ १ ॥

शेषमनुज्ञाप्य प्रत्येत्य प्राग्दक्षिणायतं चतुरश्रं गोमयेनोपलिप्यापहता असुरा रक्षांसि पिशाचाः पितृषद इति मध्ये रेखां काष्ठेनोल्लिख्य ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति परापुरो निपुरो ये भरन्त्यग्निष्टांल्लोकात्प्रणुदात्वस्मादित्युल्मुकं[3] दक्षिणतो निदधात्यनुलिख्य दर्भानास्तीर्योदपात्रेणाचामयत्याचाम पितरसौ ये च त्वात्रानु ते चाचामन्त्वित्येवं पितामहायैवं प्रपितामहाय तेषु पिण्डान्निदधात्यनुनामापहस्तेनैतत्ते पितरसौ ये च त्वात्रानु तेभ्यश्च स्वधा नम इत्येवं पितामहायैवं प्रपितामहाय नामान्यजानतः पितरेतत्ते पितामहैतत्ते प्रपितामहैतत्त इति बन्धजानत इदं पितृभ्यः पृथिवीषद्भ्य इदं पितामहेभ्यो ऽन्तरिक्षसद्भ्य इदं प्रपितामहेभ्यो दिविषद्भ्य इत्यत्र पितरो मादयध्वं यथाभागमावृषायध्वमित्युदगावृत्या तमितोरासीतामीमदन्त पितरो यथाभागमावृषायिषतेति जपित्वा पूर्ववदाचामय्य[4] नीवीं[5] विस्रंस्य[6] नमस्कारान्कृत्वा यथादैवतमेतद्वः पितर इति वस्त्राण्यादिशत्यूर्णास्तुकां दशाम्बरं वा एतद्वः पितरो वासो गृहान्नः पितरो दत्ताधत्त पितरो गर्भं कुमारं पुष्करस्रजं यथेह

१ Zoo B; आचामेत् $M^2$; आचामइति $M^1$.

२ $M^1$ heeft na भूत्वा nog: अप उपस्पृश्य.

३ प्रणुनोत्व° de HSS. ४ आचम्य de HSS. ५ Zoo alle (निवीं B).

६ Zoo $M^2$; विस्रस्य B; विसृज्य $M^1$.

पुरुषो ऽसदित्यंजनाभ्यञ्जने ददात्याङ्क्ष्वासावित्यभ्यङ्क्ष्वासाविति ' गन्धान्सुमनसश्च दद्यान्नमो वः पितर इति षड्भिर्नमस्कारैरुपतिष्ठते ' नमो वः पितरो रसाय[1] नमो वः पितरः शुष्माय[1] नमो वः पितरो जीवाय[1] नमो वः पितरो घोराय[1] नमो वः पितरो बलाय[1] नमो वः पितरो मन्यवे स्वधायै च पितरो नमो व इत्यूर्जं[1] वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतं[2] स्वधा स्थ तर्पयत मे पितॄनित्यपः प्रसिच्य[3] ' मा मे क्षेष्टेत्यभिमन्त्र्य[4] मा मे क्षेष्ट बहु मे पूर्तमस्तु ब्रह्माणो मे जुषन्तामन्नमन्नम् । सहस्रधारममृतोदकं मे पूर्तमस्त्वेतत्परमे व्योमन् ॥ देवाश्च पितरश्चैतत्पूर्तं मे अत्रोपजीवताम् । अक्षीयमाणमुपजीवतेतन्मया प्रत्तं स्वधया मदधमिति ' ये समानाः सुमनस[5] इति प्रदक्षिणं कृत्वा ' ये समानाः सुमनसो[6] जीवा जीवेषु मामकाः । तेषां श्रीर्मयि कल्पतामस्मिंल्लोके शतं समा इत्यामयावी पिण्डान्प्राश्नीयादन्नाद्यकामो वाग्नौ वा संक्षेपयेदप्सु[7] वाभ्यवहरेयुरजं गां ब्राह्मणं वा प्राशयेयुः[8] ' शेषस्य[9] प्राश्नीयान्न चान्नतृप्तिं गच्छेत् ' ॥ २ ॥

ऊर्ध्वमाग्रहायण्यास्त्रयो ऽपरपक्षास्तेषामेकैकस्मिन्नेकैकाष्टका भवति शाकाष्टका मांसाष्टकापूपाष्टकेति ' तत्र शाकमांसापूपानि हवींष्योदनं च ' तेषां हविषां स्थालीपाकावृताग्नौ जुहुयादष्टकायै स्वाहा एकाष्टकायै स्वाहा अष्टकायै[10] सुराधसे स्वाहा संवत्सराय परिव-

---

[1] In het volgende geef ik de recensie van M¹; telkens na een datief volgen in B M² gedeeltelijk verkort, gedeeltelijk bedorven, de woorden: स्वधायै च पितरो नमो वः; M¹ geeft deze toevoeging alleen na de zes namaskāramantra's en voegt na इति in: पर्यान्तेषु. Had de tekst oorspr.: नमस्कारैरुपतिष्ठते नमो वः . . . स्वधायै च पितरो नमो व इत्यन्तैः? [2] परिसृतं de HSS. [3] अपः प्रसिच्य om. M¹. [4] क्षेडेत्यामन्त्र्य M¹. [5] Zoo M¹. [6] Hier M¹: समनसो; सुम° B M² (ook comm.). [7] संक्षापयेत् M¹. [8] Zoo M¹; °प्राशयेत् B M². [9] न ins. M¹. [10] Zoo M¹; °काय B M².

त्सरायेदावत्सरायेद्वत्सरायावत्सराय[१] कृणुता नमोभिः । तस्य वयं सुमतौ यज्ञियानां ज्योगजीता अहताः स्याम स्वाहेति' हुत्वोपतिष्ठत एहि भगेहि भगेहि भगेति[२]' मध्यमायां गां कारयेत्तामष्टकायै प्रोक्षेत्तस्यास्त्रीणि सव्यान्युपोद्धरति पार्श्वमपघनीं[३] श्रोणीमिति[४]' श्वोभूते श्राद्धमन्वष्टक्यं तदहर्वा' ब्राह्मणान्हविर्धानुप्रवेश्य तांस्तर्पयित्वा तस्मादग्नेर्दक्षिणतः षडग्नीन्प्रणीय तेषामेकैकस्मिन्नेकैकां कर्षूं खानयेदायामेन प्रादेशमात्रीं पार्थिवेन त्र्यङ्गुलामवागेकाङ्गुलामिति' तासु पिण्डान्निदध्यात्यनुनामापहस्तेन' मज्जाः पितृभ्य उपकर्षति[५]' पार्श्वानि स्त्रीणां' तत्राध्वर्यवः केचिदधीयते मध्यमं पिण्डं पत्नी प्राश्नीयात्प्रजाकामस्य तथा श्राद्धस्य स्थालीपाकं वा श्राद्धस्य स्थालीपाकं वा[६]' ॥ ३ ॥

आहिताग्नेः शरीरनाशे त्रीणि षष्टिशतानि पलाशत्सरूणामाहृत्य तैः प्रतिकृतिं कुर्यात्कृष्णाजिने' अशीत्यर्धं शिरसि दध्याद्ग्रीवायां तु दशैव तु' बाह्वोश्चैव शतं दध्यादङ्गुलीषु पुनर्दश' उरसि त्रिंशतं दध्याज्जठरे विंशतिं तथोर्वोश्चैव शतं दध्यात्' मेढ्रे[७] चापि दशैव तु' जानुजङ्घयोस्त्रिंशतं दध्यात्' दश पादाङ्गुलीष्वपि[८] इत्येतावन्तीह[९] पुरुषस्य शरीराणि भवन्तीति विज्ञायते मध्ये शरीरं' सतीशरीरमुप्तकेशं[१०] निकृत्तनखं प्रक्षालितं[११] चितामारोपयत्यत्र पात्राण्यपि[१२]

---

१ Onzeker; voor इद्वत्सराय voegt B in: इदुवत्सराय; verder heeft B: इद्वत्सरायायवत्सराय; na इद्वत्सराय heeft $M^2$: वत्सरायायवत्सराय, $M^1$: वत्सरंवत्सराय. Het moeten er vijf zijn, volgens den comm. २ Zoo B; $M^2$ slechts tweemaal एहि भग. $M^1$ tweemaal en aan 't eind: भगेति: ३ Zoo B; अपघ्नीं $M^2$; अपघ्नतीं $M^1$. ४ Zoo B $M^2$; श्रोणिमिति $M^1$. ५ Zoo B; कर्षन्ति $M^2$; पितृभ्योऽवकर्षति $M^1$. ६ De herhaling der slotwoorden alleen in $M^1$. ७ मेध्रे B (in den comm., dit stuk in den tekst ontbr.); मेढ्रे $M^1$. ८ अपि niet in $M^1$. ९ Zoo alle HSS. De juiste lezing is ongetwijfeld: एतावन्ति ह. १० सति B $M^1$; सती comm.; i. p. v. het door mij gerestitueerde उप्तकेश° lezen de HSS. लुप्त°. De tekst is waarschijnlijk corrupt. Moet men lezen: सति शरीर उप्त°? ११ Niet in B. १२ अप B i. p. v. अपि.

चिनोति ' तस्यामेनमादधाति [१] ' तस्य नासिकयोः स्रुवौ निदध्यादित्येतेनानुवाकेन य एवंवित्स्यात्स यदोपतापी स्यादिति [२] पूर्वमेव चतुर्गृहीतं गृहीत्वान्यं [३] यथासंभवमास्ये हिरण्यशकलमाधायाग्नीनुपोह्य [४] सामभिरुपतिष्ठते नाके सुपर्णमिति ग्राम्यं गेयमुदित्ते धूमे वपस्ते धूम ऋण्वतीत्यग्नौ समारूढे ऽग्ने मृड महं [५] असीत्येतयोरन्यतरेण पराक् [६] ' पराग्वा [७] असौ लोक इति ब्राह्मणम् ' ॥ ४ ॥

आहिताग्निश्चेत्पूर्वं जाया म्रियेत तां निर्मन्थ्येन दहेत्सांतपनेन वा ' श्मशानकृतं स्वकृतमनिरिणमपसलवक्रोदकं [८] कृत्वा यत्र वौषधयो जायन्ते तत्र शरीरं दग्ध्वोदककरणाय यान्त्यनवेक्षमाणा ' न वाहिनीषु कुर्वन्ति ' तेषां योयः पश्चाज्जातः ससो [९] ऽग्रं कुर्यादुपकूलमंकूले कूपं खात्वा ' सव्यहस्तस्यानामिकया सकृदुदकं प्रोक्षति प्रेतस्य नामकरणेन ' वाहिनीषु चेदुद्धृत्य [१०] केशान्निमज्यैकाञ्जलिं दत्वोपसंगृह्य केशानुल्मुकस्याग्निमारभेताग्ने शूकाहे [११] पापं मे ऽपहतेति ' शमीमारभेत शम्यसि शमय मे पापमित्यश्मानमारभेताश्मासि स्थिरो ऽस्यहं स्थिरो भूयासमिति ' तूष्णीं गोमयं ' कृतोदकं दक्षिणामुखमासीनं तमनुगन्तार उपविशन्ति ' तानितरः कल्याणीभिर्वाग्भिः प्रत्याह्लोपास्तमनवेलायां ग्रामं [१२] प्रविशन्ति ' तां रात्रिमेकमात्रेण वसन्ति शान्त्या वा ' श्वो भूते क्षीरोदके संसृज्य शरीराण्यवसिञ्चत्यजशृङ्गेण गोशृङ्गेण [१२] मृण्मयेन कोशेन वा [१२] ' तृतीयायां गन्धौषधीभिः संसृज्य शमीशाखया पलाशशाखया वासंह्लादयन्कुम्भ्यामवदध्यात्स्त्री

---

१ °दधाति B.　२ इति slechts in B.　३ अन्यं slechts in B.　४ आदाय de HSS.; उपोह्य M¹, प्रोह्य B.　५ Zoo (recte!) de HSS.　६ परात् M¹; B om.　७ Na वा voegen de beide HSS. इति in.　८ स्वकृतं niet in B.

९ B laat het eerste demonstr. weg; °जातासो M¹.　१० HSS. bedorven; M¹: चेन्दुकृत्ये; B: दुतग्रत्य (slechts de syllabe चे schijnt hier dus te ontbreken).

११ Zoo B (en comm.); शोकाहे M¹.　१२ Niet in M¹.

चेद्दृढ एव[१] दध्याच्चतुष्पथमतीत्य महावृक्षं नदीं वा तीर्थेषु निखनेत्। प्रेतस्य तृतीयायां स्नापयन्त्यपामार्गेण मृदा गोमयेन च[२]। वासांसि प्रक्षाल्य दशरात्रमासते[३]। चतुर्थ्यां भिक्षामावर्तयेरंस्तस्य सिद्धमग्नौकरणं[४]। कालं च यावदाकाङ्क्षेयुर्भिक्षयानुसंतरेयुरूर्ध्वं[५] दशरात्राच्छ्राद्धं दद्युर्न दद्युरा श्राद्धस्य प्रदानान्नक्षत्रेषु[६] नियमो। मघास्वेकतारेषु भरणीषु च पूर्वसमयेषु[७]। न रोहिण्यामुत्तरेषु ध्रुवेषु। ब्राह्मणान्हविरर्हानुपवेश्य तांस्तर्पयित्वैकवत्पिण्डं दद्यान्नं चान्विति[८] ब्रूयात्सर्वैः कामैस्तर्पयेदनुगमनं कृत्वा शेषमनुज्ञाप्य प्रत्येत्य शेषं[९] न प्राश्नीयाद्ब्राह्मणान्स्वस्ति वाच्य प्राश्नीयात्। ॥ ५ ॥

अथातो गृहकर्माणि। गृहवृद्धिमिच्छन्मासिमास्यृतावृतौ संवत्सरेसंवत्सरे वा[१०] पूर्वपक्षे पुण्ये नक्षत्रे गृहशान्तिमारभेतापामार्गपलाशशिरीषार्कौदुम्बरसदाभद्रामृततृणमिन्द्रवल्लीभिर्बद्ध्वा गृहान्परिमार्ज्य परिसमूह्यापो ऽभ्युक्ष्य पञ्चगव्यैर्दर्भमुष्टिना संप्रोक्ष्य सिद्धार्थकान्संप्रकीर्य[११] वास्तुबलिं कृत्वा वास्तोर्मध्ये वास्तोष्पतिं हुत्वा सावित्र्या सहस्रं जुहुयात्ततो दक्षिणपुरस्तात्ततो दक्षिणपश्चात्तत उत्तरपुरस्तात्तत उत्तरपश्चान्मध्ये वा। गौर्वासो हिरण्यं दक्षिणा। ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्त्यृद्धिमिति वाचयित्वैवं प्रयुञ्जानो ऽनन्तं महान्तं पोषं पुष्यति। बहवः पुत्रा भवन्ति। न च बालाः प्रमीयन्ते। नाग्निर्दहति। न दंष्ट्रिणः खादयेयुर्न तस्कराः सपत्ना रक्षांसि पिशाचा अपि

---

१ Niet in $M^1$. २ चा $M^1$; ontbr. in B; comm. echter च. ३ Zoo B; दशरात्रोयं $M^1$. ४ Niet in B; uit den comm. echter schijnt te volgen, dat deze woorden, die in M zoo luiden: तस्यासिद्धंकग्नौकरणं, tot den tekst behooren. ५ अनु niet in B; $M^1$ heeft: कालञ्चकांक्षेयुः भिक्षयानुसंतनीयुः

६ Voor नक्षत्रेषु heeft $M^1$ nog den volgenden mij onverstaanbaren zin: पम्युद्देदकपम्यत्रो ७ $M^1$ ins. वा ८ च niet in B. ९ om. B; प्रेत्य $M^1$.

१० Niet in $M^1$. ११ °सं° slechts in $M^1$.

बाधन्ते ' यदि गावः प्रजायेरन्गवां मध्ये आहुतिसहस्रं जुहुयादित्येतेनैव कल्पेनाश्वोष्ट्रखराजाविकमहिषहस्तिकुलमन्यतरद्द्विपदां चतुष्पदां च[1] व्याख्यातम् ' ॥ ६ ॥

अथातोऽद्भुतशान्तिं व्याख्यास्यामो ' ऽथ यस्यागारे स्थूणा विरोहेत्[2] कपोतो वागारं गच्छेद्गौर्वा गां धयेदनड्वान्वा[3] दिवमुल्लिखेदनग्नौ[4] वा धूमो जायेतानग्नौ वा दीप्येत मधु[5] वा[5] जायेत वल्मीकं वोपजायेत मण्डूको वाम्भृणो[6] वाश्वेच्छानो[6] वा गृहे पर्यटेयुरित्येतानन्यांश्च यत इन्द्र भयामहे । सदसस्पतिमद्भुतम् । अधायामुतेमुमुदस्य[7] । सनादग्ने । यद्वा उ विश्पतिः शितः । प्रत्यग्ने । यं रक्षन्ति । प्राजापत्ययर्चा[8] पुरस्ताच्चोपरिष्टाच्च[9] महाव्याहृतिभिर्जुहोति[10] ' एतान्यृक्सामानि गायेत् ' ॥ ७ ॥

अथातोऽनश्नत्संहितायाः कल्पं व्याख्यास्यामः ' शुचिवासाः स्याच्चीरवासा वा ' हविष्यमन्नमशनमिच्छेदपः फलानि वा ' ब्राह्मणास्त्वेव[11] प्रत्याहरेत्प्राङ् वोदङ् वा ग्रामान्निष्क्रम्य शुचौ देश उदकान्ते वा गोमयेन गोचर्ममात्रं स्थण्डिलमुपलिप्य प्रोक्ष्य लक्षणमुल्लिख्याद्भिरभ्युक्ष्याग्निमुपसमाधायाघारावाज्यभागौ हुत्वाज्याहुतीर्जुहोत्यग्नये सोमाय रुद्रायेन्द्राय ब्रह्मणे प्रजापतये बृहस्पतये विश्वेभ्यो देवेभ्य ऋषिभ्य ऋग्भ्यो यजुर्भ्यः सामभ्यः श्रद्धायै प्रज्ञायै मेधायै सावित्र्यै सदसस्पतयेऽनुमतये च ' हुत्वा दर्भेष्वासीनः प्राक्कूलेषूदक्कूलेषु वा दक्षिणेन पाणिना दर्भान्धारयन्नोंपूर्वा व्याहृतीः सावित्रीं च चतुरनुद्रुत्य मनसा सामसावित्रीं च सोमं राजानं ब्रह्मजज्ञानीये चाभि

---

१ Niet in B. २ वरोहेत् ३ गन्धयेयु अनडुवा ४ °खेत् अग्नौ
५ मधुना ६ वाभ्रणोवाशपेड्डुमानो ७ Citaat bedorven. ८ प्राजापत्यायाच
९ °पुरस्तात् वोपरि° १० °व्याहृतीर्जु° ११ °स्त्वेवा B; °स्त्वेवं M²; °स्त्वैवं M¹.

वेदादिमारभेत ' संततमधीयीत मौनी ' न चान्तरा विरमेत्[1] ' अथान्तरा व्याहरेदथान्तरा विरमेत्[2] ' त्रीन्प्राणानायम्यातम्याचम्य[3] कृतान्तादेवारभेता'प्रतिभायां यावता कालेन वेदमधीयीत तावत्कालमधीयीत यज्जानीयादृक्तो यजुष्टः सामतस्तदवाप्नुयात्'ब्राह्मणं तच्छान्दसं तद्दैवतं साम वा ' अक्रानित्येतदेव वाभ्यस्येत्'तिष्ठन्नासीनः शयानश्चङ्क्रम्यमाणो[4] वा संहितां प्रयुञ्ज्यात्'समृद्धिरेवास्य भवत्या'द्यं त्रिवर्गं वा सहस्रकृत्व इति जैमिनिश्च वार्यभक्तं[5] वा ' यथाकामी वा ' द्वादश संहिता अधीत्य यदनेनानध्यायेष्वधीतं यद्गुरवः कोपिता यान्यकार्याणि कृतानि ताभिः पवते ' शुद्धमस्य पूतं ब्रह्म भवत्य'थापरा द्वादश संहिता अधीत्य ताभिः प्रजापतेर्लोकमवाप्नोत्य'थापरा द्वादश संहिता अधीत्य ताभिरुशनसो लोकमवाप्नोत्य'नश्नन्संहितासहस्रमधीत्य ब्रह्मभूतो विरजो भवति कामचारी सर्वान्कामानवाप्नोति ' संवत्सरं भैक्षभक्षः प्रयुञ्जानश्चतुर्लभते ' षण्मासान्यावकभक्षश्चतुरो मासानुदकसक्तुभक्षो द्वौ मासौ फलभक्षो मासमब्भक्षो द्वादशरात्रं वानश्नन्[6] क्षिप्रमन्तर्धीयेते ' ज्ञातीन्पुनाति ' सप्तातीतान्सप्तानागतानात्मानं च पञ्चदशं तारयते ' तामेतां देवनिश्रेणीत्याचक्षते ' एतया वै देवा देवत्वमगच्छन्नृषय ऋषित्वं ' तस्य ह वा एतस्य ब्रह्मसत्त्रस्य त्रिविध एवारम्भो भवति प्रातःसवने माध्यंदिने सवने ब्राह्मे वापररात्रे ' तस्य ह वा एतस्य द्वावेवानध्यायौ यदात्माशुचिर्यद्देशस्'तद्वा एतत्प्रजापतिः सप्तऋषिभ्यः प्रोवाच सप्तऋषयो महाजज्ञवे महाजज्ञुर्ब्राह्मणेभ्यो ब्राह्मणेभ्यः ' ॥ ८ ॥

---

१ Zoo B M[2]; व्याहरेत् M[1].

२ Zoo M[2]; B om. अन्तरा voor विरमेत्; M[1] om. अथान्तरा व्याहरेत्.

३ आतम्य slechts in B, i. p. daarvan M[2]: आचम्य; M[1] om.

४ शयानः slechts in M[1]; °चङ्क्रम्य° beide HSS.

५ Zoo verbeterd; °चार्यभक्तं B; चर्याभक्तं M[1]. ६ वानश्नात् B; वाप्राश्नात् M[1].

अथ ग्रहाणामातिथ्यं बलिकर्मोपहृतं[1] व्याख्यास्यामः' अग्नादधानमशुचिकरणमज्ञाप्यं[2] त्यक्तमङ्गलं । सुव्यक्तं ग्रहा नयन्ति[3] पुरुषं यमसादनम्[4] । ग्रहाणां दीप्तचेष्टानां नक्षत्रपथचारिणाम् । ग्रहातिथ्यं[5] प्रवक्ष्यामि शान्तिकर्माणि कारयेत् । भास्कराङ्गरकौ[6] रक्तौ श्वेतौ शुक्रनिशाकरौ । सोमपुत्रो[7] गुरुश्चैव तावुभौ पीतकौ स्मृतौ । कृष्णं शनैश्चरं विद्याद्राहुं केतुं तथैव च । ग्रहवर्णानि पुष्पाणि प्राज्ञस्तत्रोपकल्पयेत् । गोमयेन गोचर्ममात्रं स्थण्डिलमुपलिप्य प्रोक्ष्य लक्षणमुल्लिख्याद्भिरभ्युक्ष्याग्निमुपसमाधायाघारावाज्यभागौ हुत्वा ग्रहानावाहयन्त्यादित्यं मध्ये लोहितं[8] पूर्वदक्षिणतः सोमम् । पूर्वोत्तरतो बुधमुत्तरेण[9] गुरुं पूर्वेण भार्गवम् । पश्चिमे शनैश्चरं विद्याद्राहुं दक्षिणपश्चिमे[10] पश्चिमोत्तरतः केतुं[11] वृत्तमादित्याय त्रिकोणमङ्गारकस्य चतुरश्रं[12] सोमाय बाणं बुधाय दीर्घचतुरश्रं बृहस्पतये पञ्चकोणं शुक्राय धनुः शनैश्चराय राहोः शूर्पं केतोर्ध्वजमिति[13]' ईश्वरं भास्करं विद्यात्[14] उमां सोमं तथैव च । स्कन्दमङ्गारकं चैव बुधो[15] नारायणः स्थितः । बृहस्पतिः[16] स्वयं ब्रह्म शुक्रः शक्रस्तथैव[17] च । यमं शनैश्चरं विद्याद्राहोः कालदूतिनः[18] केतोश्चित्रगुप्तश्चेत्येते ग्रहदेवताः' अग्निरापो भूमिर्विष्णुरिन्द्राणी प्रजापतिः सर्पा ब्रह्मेत्येते प्रत्यधिदेवताः' जातमर्क[19] कलिङ्गेषु यामुनेषु च चन्द्रमाः। विन्ध्य अङ्गारकदेशो[20] मध्यदेशो[21] बुधः स्मृतः । बृहस्पतिः सिन्धुदेशः शक्रदेशो[22] घटेषु च । शनैश्चरस्तु सौराष्ट्रो राहुस्तु पूर्वदे-

---

१ Sic! moet men lezen: °कर्मोपहृतं? २ Sic! °करण° moet wel geschrapt worden? ३ नावाहयन्ति ४ °दने ५ ग्रहातीर्थं ६ °ङ्गारकौ ७ सोपुत्रो ८ Na लोहितं wordt nog दक्षिणतः ingevoegd. ९ गुधंउत्त° १० दक्षिणतः प° ११ केतु १२ °श्रां १३ धुजग्रमिति १४ चैव i. p. v. विद्यात् १५ बुधं १६ °पतिं १७ शुक्रं शक्रं १८ Sic! १९ Sic! जातो ऽर्कः te lezen? २० विन्ध्यामङ्गारको देशो २१ मध्यादेशो २२ शक्रोदेशो

शिकः केतुः पर्वत इत्येते देशानां ग्रहजात[1] इति' अर्कसमिधमादित्याय प्रादेशमात्राभिघारितानाम्यादिभिर्जुहुयात्[2]' खादिरमङ्गारकाय पालाशं सोमायापामार्गं बुधायाश्वत्थं बृहस्पतय औदुम्बरं शुक्राय शमीं शनैश्चराय राहोर्दूर्वाः केतोः कुशाग्रमित्यष्टाविंशतिमाज्याहुतीर्जुहोत्येताभिः पञ्चाग्नेर्जुहोत्यादित्याय इलोदनं[3] हविष्यमन्नमङ्गारकाय[4] सोमाय घृतपायसं पयोदनं बृहस्पतये क्षीरोदनं[5] शुक्राय दध्योदनं बुधाय[6] तिलपिष्टमाषोदनं शनैश्चराय राहोर्मांसोदनं केतोश्चित्रोदनमिति' आ सत्येनेत्यादित्याय[7]' अग्निर्मूर्धा दिव इत्यङ्गारकाय' आप्यायस्व समेतु इति सोमाय' ब्रह्म जज्ञानमिति बुधाय' बृहस्पते अति यदर्य इति बृहस्पतये' अस्य प्रत्नामनु द्युतमिति शुक्राय शं नो देवीरभिष्टय इति शनैश्चराय' कया नश्चित्र आभुवदिति राहोः' केतुं कृण्वन्नकेतव इति केतोः' रक्तां[8] धेनुमादित्याय' रक्तमनड्वाहमङ्गारकाय' सोमाय शङ्खं' बुधाय काञ्चनं' बृहस्पतये वासः' शुक्राय हयं' नीलां गां शनैश्चराय' राहोः कृष्णायसं' केतोः कुञ्जरमिति' सर्वेषामपि हिरण्यं वा येन वा तुष्यत्याचार्यस्तद्ददाति' यथा समुत्थितं यन्त्रं[9] यन्त्रेण प्रतिहन्यते । तथा ग्रहोपसृष्टानां शान्तिर्भवति दारुणाम्[10] ॥ नादिशेत्तपसा युक्तं नादिशेद्दिवमाश्रितम् । न च वेदान्तकं विप्रं वृत्तान्तां नारीं परिवृताम्[11] ॥ अहिंसकस्य दान्तस्य धर्मार्जितधनस्य च । नित्यं च नियमस्थस्य[12] सदानुग्रहा ग्रहाः ॥ ग्रहा गावो नरेन्द्राश्च ब्राह्मणाश्च विशेषतः । पूजिताः पूजयन्त्येते निर्दहन्त्यवमानिताः ॥ १ ॥

॥ इति जैमिनिसूत्रं समाप्तम् ॥

---

1 Sic! moet इत्येतेषु देशेषु ग्रहा जाता इति gelezen worden? 2 Sic! 3 Sic! 4 हविष्य° 5 क्षीरोदनं 6 Dit woord hier door mij ingevoegd. 7 सासत्यनेत्य° 8 रक्तु 9 °स्थितम°; यन्त्रं moet bedorven zijn; Baudh. heeft घोरं 10 Sic! 11 Bedorven Śloka! 12 तिष्ठनीयमस्थस्य

# UITTREKSELS

UIT DEN

# COMMENTAAR.

## श्रीनिवासाध्वरिविरचिता जैमिनिसूत्रव्याख्या
## सुबोधिनी ॥

जैमिनिसूत्रं पूर्वम् ।

प्रथमः खण्डः ॥

पादैर्हस्तैः शिरोभिश्च भूर्भुवःस्वरधिष्ठितम् ।
ज्योतिष्पूरं दुरालोकं ज्वलज्जाम्बूनदप्रभम् ॥
संप्रवृत्तिनिवृत्तिभ्यां संविदः सलिलस्य च ।
विराजमानं विश्वेषां हृदि सूर्ये च संततम् ॥
अनाद्यन्तमनीशं तमन्तराध्यायपूरुषम् ।
प्राक्कारिकाश्च वृत्तीश्च मन्वादेर्वचनान्यपि ॥
न्यायांश्च शिष्टाचारांश्च समालोच्य पुनःपुनः ।
संचिताखिलसारापि स्वल्पग्रन्था सुबोधिनी ॥
व्याख्यया व्यक्तयोपेता मन्त्राणां च यथामति ।
टीका जैमिनिसूत्रस्य श्रीनिवासेन तन्यते ॥
नात्र प्रमाणेन विना कश्चिदप्यर्थ उच्यते ।
नानूद्यते प्रमाणं तु ग्रन्थविस्तरशङ्कया ॥

ad p. 1. r. 1—2. अथेति मङ्गलार्थमनत इत्यारम्भार्थम् । अग्निं प्रणयिष्यन्प्रदेशान्तरे स्थापयितुमिच्छन्विहितकर्मण इति शेषः । प्रागुत्तरप्रदेशावनतं स्थण्डिलं कृत्वाभ्युक्ष्य तस्य मध्ये वक्ष्यमाणप-

क्षरेखात्मकलक्षणं दर्भादिना लिखेत् । गोमयेनोपलिप्य त्रिरुद्धृत्यावोक्षितायां भुवि पञ्चप्रस्थमिताभिः सिकताभिर्मृद्भिर्वा कृतमरत्निचतुरश्रं धिष्ण्यं स्थण्डिलमिति पूर्वाचार्यसंज्ञा ॥

ad p. 1, r. 2—3. स्थण्डिलमध्यात्प्राङ्मुखीं रेखामुल्लिख्य तस्याः पश्चात्तया संहितां संयुक्तामुदङ्मुखीमरत्न्यायतां रेखामुल्लिख्य तस्याः पश्चात्तस्या मध्ये समातये तिस्रः प्राङ्मुख्यो रेखाः प्रादेशायामा उल्लिखेरन् । तथा च प्रत्यङ्मुखशूलाकृतिलक्षणं भवति ॥

ad p. 1, r. 4. यस्मिन्होममात्रं प्रधानं स हुतः औपासनादिः । यस्मिन्न विद्यते होमः स अहुतः सन्ध्यावन्दनादिः । यस्मिन्होमोऽन्यच्च प्रधानं स प्रहुतः पुंसुवनादिः । पुंसुवने हि पुरुषसूक्तहोमः पुल्लिङ्गप्रश्नश्च प्रधानं । प्राशितं श्राद्धकर्म । एवं चतुर्धा पाकयज्ञान्व्याख्यास्यामः । यस्मादेते दर्शपूर्णमासादिभ्योऽल्पे भवन्ति तस्मादेषु पाकयज्ञाख्या । पाकशब्दो ह्यत्राल्पार्थकः ॥

ad p. 1, r. 5. तेषां पाकयज्ञानां होम एकाग्नौ कर्तव्यः । न तु कर्मणिकर्मणि पृथगग्निरुपादेयः । सर्वकर्मार्थमेको ऽग्निर्धार्यः । स चार्थादौपासनाग्निरिति प्रसिद्धं । ब्रह्मचर्याद्यर्थसमिदाधानादिस्तु तेषामौपासनाद्यसंभवाल्लौकिके इति सिद्धम् ॥

ad p. 1, r. 5. एते कर्मादौ स्तः विकल्पानुक्तेरेव नित्यत्वे सिद्धे नित्यशब्दग्रहणं स्त्रिया अपि यज्ञोपवीताकारेण उत्तरीयं कर्माङ्गं भवति । श्रोतस्पर्शाद्यनुकल्पव्यावृत्त्यर्थमुदकग्रहणम् ॥

ad p. 1, r. 5. एते पाकयज्ञा दर्शपूर्णमासतन्त्रसदृशतन्त्रा भवन्ति । एतेन यदेतेष्वनुक्तमाकाङ्क्षितं तद्दर्शपूर्णमासाभ्यामानेतव्यं । यथा खादिरः पालाशो वेध्म इत्युक्ते एकविंशतिरिध्मदारूणीति ॥

ad p. 1, r. 6. वाशब्दश्चार्थः । एते स्वतन्त्राश्च भवन्ति न सर्वत्रैषां

दर्शपूर्णमासतन्त्रमानेतव्यमित्यर्थः । तेनात्र न ऋत्विग्वरणादि । तथा च सूत्रद्वयार्थ आचाराद्यवस्थापनीयः ॥

ad p. 1, r. 6. पूर्णपात्रस्य दक्षिणात्वं वक्ष्यति (p. 6, r. 1) । तद्योग्ययथाशक्ति व्रीह्यादिपूर्णं पात्रमित्यर्थः ॥

ad p. 1, r. 6. पूर्णपात्रस्य पुरस्तात्खादिरादिमयं जलपूर्णं स्रुवं चोपनिदधाति ॥

ad p. 1, r. 7. इध्मश्च बर्हिश्चेध्माबर्हिः । उपलक्षणमेतत् । अनिर्दिष्टस्थानं सर्वमुत्तरत उपनिदधाति । प्रोक्षणीनामग्नेः पश्चादुपनिधानमाचारात् ॥

ad p. 1, r. 12–13. शुक्लानां सुमनसामलाभे जपापुष्पादीनि पञ्च वर्जयित्वा । गन्धवत्यश्चेत्सर्ववर्णाः कृष्णरक्तादिवर्णाः सुमनसो ग्राह्याः । वाशब्दश्चार्थः ॥

ad p. 1, r. 13–14. ऊधन्यं नवनीतं वा । वाज्यं वा घनीभूतं । दधि वा पयो वा । एताश्चतस्र आज्यप्रकृतय आज्यहेतव आज्यकार्ये भवन्ति यद्याज्यं न लभ्यते ॥

ad. p. 1, r. 14. प्राग्विहितस्याचमनस्य प्रदेशनियमोऽयम् ॥

ad p. 1, r. 14–15. प्रसङ्गात्सार्वत्रिकस्याचमनस्यायमनुष्ठानक्रम उच्यते ॥

ad p. 1, r. 15. शीर्षण्यान्प्राणान् चक्षुषी नासिके श्रोत्रे चेत्यर्थः ॥

ad p. 2, r. 3. रात्रिश्चेन्मन्त्रजपकालः धनमिति पदमपोह्य तत्स्थाने वस्विति ब्रूयात् ॥

ad p. 2, r. 4. परिसमूहनं नाम आर्द्रेण पाणिना अग्निं परितः संमार्जनं तच्च प्रत्यृचमन्ते सकृत्सकृद्भवति ॥

ad p. 2, r. 4–5. प्रस्तरमुपसंगृह्य सप्रस्तरेण पाणिना प्रतिदिशं

प्राङ्दक्षिणादिक्रमेण दक्षिणपुरस्तादुपक्रम्य प्राचीनानां मूलानि दक्षिणोत्तराग्रैस्तन्मूलानि च प्रतीचीनाग्रैश्छादयन्सर्वत्र प्रागग्रैर्दर्भैः पूर्वपश्चिमयोः प्रादेशमात्रैरितरेतरयोररत्निमात्रैः परिस्तृणाति ॥

ad p. 2, r. 5. पश्चिमतो वा प्रथमं परिस्तीर्यानन्तरं द्वाभ्यामुत्त-पराग्राभ्यां दर्भमुष्टिभ्यामरत्निमात्राभ्यां पश्चिमपरिस्तरणदक्षिणोत्तरयोः संसक्तमूलाभ्यां पूर्वस्यां मध्ये संहिताग्राभ्यामुपहरेत्परिस्तृणीयात् ॥

ad p. 2, r. 6. पूर्वस्यामुक्तः परिस्तरणसन्धिस्तु दक्षिणोत्तरो भवति । दक्षिणपरिस्तरणमुत्तरमुपरिगतं यस्मिन्तादृशो भवतीत्यर्थः । पक्षद्वये प्रथमश्चतुरश्रः द्वितीयस्त्रिकोण इति वेदितव्यम् ॥

द्वितीयः खण्डः ॥

ad p. 2, r. 7. पूर्वगृहीतात्प्रस्तरात्पवित्रसंज्ञे भाविनी तृणे अप्रशीर्णाग्रे अच्छिन्नाग्रे अनन्तर्गर्भे अन्तस्तृणान्तररहिते प्रादेशमात्रे ते गृह्णाति ॥

ad p. 2, r. 10—14. ते पवित्रे कस्यचित्पात्रस्योपरिष्टाद्वामकरेण धारयंस्तस्मिन्पात्रे पवित्रे प्लावयन्नाज्यमासिच्य अग्नेरुत्तरतः परिस्तरणस्यान्तरेव कतिचिदङ्गारान्पृथक्कृत्य तेषु तदाज्यमारोप्य दर्भज्वालया प्रदीप्य दर्भाग्राभ्यां छित्वा त्रिर्दर्भज्वालया प्रदक्षिणीकृत्य परिस्तरणादुत्तरत आज्यमवरोप्याङ्गारानग्नौ संयोज्य उदगग्राभ्यां पवित्राभ्यामाज्यं च हविश्च प्रणीताश्च स्रुवं चानेन यजुषा त्रिरुत्पुनाति प्रागपवर्गं मन्त्रान्तैः सकृत्सकृदिति वक्ष्यति (p. 2. r. 15) । देवः सविता त्वा त्वां । उत्पवनीयं वस्तु पुनातु पवित्रीकरोतु । अच्छिद्रेण पवित्रेणादित्येनासौ वा आदित्यो ऽच्छिद्रं पवित्रमिति ब्राह्मणं । वसोस्तेजस्विनः सूर्यस्य रश्मिभिश्चोत्पुनात्विति मन्त्रार्थः ॥

ad p. 2, r. 15. आज्यस्य विहितमुत्पवनं । पश्चिमतः पवित्रे

पुनराहृत्य आहृत्य कर्तव्यं । तथा च पवित्रे प्रागानीय पश्चानीया प्रागानेतव्ये इति सिद्धम् ॥

ad p. 2, r. 15— p. 3, r. 8. प्रणीतार्थमुत्पूता अपः परिस्तरणाद्बहिरुत्तरतो ऽग्नेः प्रतिष्ठाप्य दर्भैः प्रच्छाद्य तथा दक्षिणतो ऽग्नेः पूर्णपात्रस्रुवयोरुत्तरतः प्रस्तरं निधाय तदुपरिष्टात्पवित्रे निधाय विरूपाक्षदैवतमिमं मन्त्रं जपति । परिस्तरणादौ प्रस्तरोपसंग्रहणस्य प्रणीताप्रणयनानन्तरं प्रस्तरनिधानस्य च विधानात्तदन्तर्विहितानि कर्माणि प्रस्तरपाणिना कर्तव्यानीति गम्यते । तप इत्यादि दश पदार्थाधिदैवतानि विरूपाक्षविभूतिभूतानि पूर्वं प्रपद्ये । तानि मामवन्तु महादिवभञ्जनशक्तं कुर्वन्तु । अनन्तरं भूर्भुवःस्वः त्रैलोक्यात्मतया वर्तमानमोमिति प्रणवान्तवेद्यशुद्धचैतन्यरूपं । महान्तमपरिच्छिन्नमात्मानं परमात्मानं त्वामध्यारोहामि शरणीकरोमि। त्वं भक्तेषु प्रकटितरौद्रवेषतया विरूपाक्षो ऽसि भयंकरनेत्रो ऽसि। दन्ताभ्यां दंष्ट्राभ्यामनक्ति व्यक्तीभवति प्रकाशते इति दन्ताञ्जिरसि । तादृशस्य ते शय्या निवासः पर्णं पर्णपटलाच्छन्नतया दुर्गमेकान्ते भवति। नमः पर्ण्याय च पर्णशद्याय चेति श्रूयते (cf. T. S. IV. 5. 9. m)। परमार्थस्वरूपस्य ते तव तु गुहा गृहं निवासस्थानमन्तरिक्षे विशुद्धहृदयदहराकाशे तच्च विमितं विगतमानमपरिच्छिन्नं । हिरण्मयं हितं च रमणीयं चादित्यवर्णमिति वा । यस्मादेवं तस्माद्देवानां सर्वेषां तानि हृदयानि सारांशा अयस्मये कुम्भ इवाच्छिद्रस्वभावे त्वयि अन्तः तदन्तर्भागे संनिहितानि संगृहीतानि । नमो वः किरिकेभ्यो देवानां हृदयेभ्य इति श्रूयते (cf. T. S. l. c. p)। सर्वदेवतात्मासीति यावत् । बलभूर्बलाकरश्च त्वं बलधा च भक्तानां बलपोषकश्च । रक्ष णो अस्मान् पालयमार्य । मा प्रमदः प्रमादादन्तरा मा

त्याक्षीः । सत्यं खलु ते तव स्वरूपमेव कथमन्तरात्यागो भवेदिति भावः । द्वादश ते तव कालरूपस्य पुत्राश्चैत्रादिमासरूपा यदङ्गेषु वसन्तादिषु सर्वो ऽपि यज्ञस्त्वां संवत्सरेसंवत्सरे कामं प्राति पूरयतीति कामप्रः कामपूरकः । तादृशेन दर्शपूर्णमासादिना यज्ञेन सर्वेण याजयित्वा पुनःपुनर्ब्रह्मचर्यं दीक्षां यष्टुमेवोपयन्ति पुनःपुनः परिवर्तमानैश्चैत्रादिभिर्यजनादेवमुच्यते त्वमेव खलु सर्वकामात्मा सर्वयज्ञानामाधारभूतो यजनीयश्चेति यावत् । लौकिकदृष्ट्या साजात्येनापि विशेषरक्षणीयतामाह । त्वं देवानामित्यादि । उपधावति शरणीकरोति । जयन्तमित्यादि कृतस्य प्रतिकरणं प्रतिहननं तन्मा कार्षीरिति भावः । त्वामित्यादि प्रसूतो ऽनुज्ञातः । शिष्टं स्पष्टम् ॥

तृतीयः खण्डः ॥

ad p. 3, r. 9—11. स्रुवगता अपः प्रणीतास्वासिच्य । स्रुवं निष्टप्य दर्भैः संमृज्य संमार्गान्संमार्जनसाधनभूतान्दर्भानभ्युक्ष्याग्नौ क्षित्वा जानु दक्षिणामाच्य अवनम्य । घृतं निरीक्ष्य । तस्मिन्नाज्ये घुणस्त्री अम्बुका (sic) पिपीलिका इत्यादिजन्तुजातममेध्यं पवित्रं किंचिदा पक्ष्म्यः पक्ष्मानधिकमवपश्येत संभाव्येत चेत्तदुद्धृत्य देवस्य त्वेत्यभ्युक्ष्यैताभ्यामेव पवित्राभ्यां प्राग्वदुत्पूय होतव्यं जुहुयात् । अधिकाशुद्धावन्यदाज्यमुपादाय यथाविधि संस्कार्यमिति भावः ॥

ad p. 3, r. 11—13. स्थवीयसं स्थवीयांसं स्थूलतमं मध्यममायामेन न्यूनमग्नेः पश्चाद्भागे । दीर्घं मध्यमं स्थौल्येन न्यूनमग्नेर्दक्षिणतः । कनीयसं कनीयांसमायामेन स्थौल्येन कनीयांसमग्नेरुत्तरतः । एवं त्रीन्परिधीन्परस्परसंस्पृष्टान्परिदधाति । विहितशुक्लसुमनोभिरग्न्यायतनमलंकुर्यात् ॥

ad p. 3, r. 13. कोशं धारां निनयति सिञ्चति ॥

ad p. 3, r. 18—20. हे जातवेदः अयमिध्मः ते आत्मा शरीरं । तेन इध्मेन वर्धस्व च इध्यस्व च दीप्यस्व चास्मानिन्द्धि दीपय वर्धय च प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय संपन्नान्कुरुष्व च ॥

ad p. 3, r. 20—22. अग्नाविव । उत्तरं परिधिसन्धिमनुगताद्देशात् वायुकोणादारभ्येत्यर्थः । अक्ष्णाया विदिङ्मुखतया यावदाग्नेयकोणमित्यर्थः । संततं निरन्तरमाज्यमासिञ्चन्प्रजापतये स्वाहेति मनसोच्चरन्स्रुवमवहृत्य नीत्वा । अथ दक्षिणं परिधिसन्धिमनुगताद्देशादिन्द्राय स्वाहेति मनसा मन्त्रमुच्चरन्प्राग्वद्यावदीशानकोणं स्रुवं नीत्वा । एवमाघारौ नाम द्वे आहुती जुहोति ॥

ad p. 4, r. 1—3. तावाज्यभागदेशावन्तरेण तयोर्मध्य इत्यर्थः । आहुतीनामासां चतसृणां वक्ष्यमाणानां च लोकः स्थानं भवतीति । एतावदग्निमुखं नाम सर्वाग्निकर्मणां पूर्वाङ्गम् ॥

ad p. 4, r. 4—5. इदमादीनि परिभाषासूत्राण्या खण्डसमाप्तेः । स्विष्टकृत्संबन्धिनः स्थानात्प्रत्यगाहुत्या आहुतिमनभिजुह्वदसंयोजयन् । हुतस्यहुतस्य उत्तरपूर्वामुत्तरपूर्वामाहुतिं जुहोति ॥

ad p. 4, r. 5—6. लाजान्वपतीति विधानात् वपनरूपहोमो लाजहोमः । लाजहोमाज्यहोमाभ्यामन्यत्र सर्वाहुतीनामन्ते सर्वाहुतीनामुत्तरपूर्वभागे स्विष्टकृदग्निर्नित्यः । अग्नये स्विष्टकृते स्वाहेति तदीयाहुतिर्नित्या सार्वत्रिकेत्यर्थः ॥

ad p. 4, r. 6—7. अवदानानन्तरं स्थालीस्थे हविषि यत्प्रत्यभिघारणं विधास्यते तत्स्विष्टकृतमवदाय न कुर्यात् शेषस्य स्विष्टकृत्प्रकारस्यानभिधानात् । उपस्तीर्य सकृदवदाय द्विरभिघारणमिति दर्शपूर्णमासत आनीयते द्विरवदानमपि पञ्चावत्तिनामिति च ॥

ad p. 4, r. 7—8. प्रत्यभिघारयति स्थालीस्थं हविरिति शेषः । अङ्गुष्ठेन संनिधानात्तर्जनीमध्यमाभ्यां चाङ्गुलिभ्याम् ॥

ad p. 4, r. 9—10. जामदग्न्यानां भार्गवाणां । तद्धि पञ्चावत्तं भवतीति पूर्वाचार्यमतानुवादः । प्रत्यभिघारणं विना स्रुवोपस्तरणेन सह पञ्च संख्या ॥

ad p. 4, r. 10. विहितमुपस्तरणमभिघारणं चाङ्गुल्या तर्जन्या दर्भकूर्चेन वा कर्तव्यमित्यर्थः ॥

चतुर्थः खण्डः ॥

ad p. 4, r. 13. निरस्यति निष्कर्षति ॥

ad p. 4, r. 14—15. अनुप्रहरति जुहोति । द्विषन्तं मे अभिधेहि जानीहि तं प्रतिदह चेति ॥

ad p. 5, r. 5—7. दर्भान्परिस्तरणानि । सदसि शुभकर्मसीति । प्रणीताचमसं प्रति ॥

ad p. 6, r. 8—12. ऋत्विजो देवाः पृथिव्यादयः पृथिवी होतेत्येवमादि श्रूयते । मासास्तद्देवता । गृहा गेहाधिष्ठात्र्यः ॥

ad p. 6, r. 1—2. यथाश्रद्धदक्षिणा येषां ते यथाश्रद्धदक्षिणा इमे सर्वे पाकयज्ञा भवन्ति । विहितहिरण्यादौ ब्राह्मणविहितेतरदानं च यथाश्रद्धं भवेदित्यर्थः ॥

ad p. 6, r. 2. विहितहिरण्यादिदानाशक्तौ सर्वपाकयज्ञेषु पूर्णपात्रमात्रं वा दक्षिणा भवति । दक्षिणा चाध्यापकाय तदभावे श्रोत्रियायेति वक्ष्यति । आवृत्तिः प्रश्नसमाप्तिद्योतनार्थः ॥

पञ्चमः खण्डः ॥

ad p. 6, r. 3. गृष्टिः प्रथमगर्भाया नार्याः पुंसुवनं । अन्यत्र चतुर्थे मासि स्यात् ॥

ad p. 6, r. 3—4. पृषदाज्यं दधियुक्तमाज्यं । स्थालीपाकवत्संस्कृत्य हविरिवोत्पूयेत्यर्थः । प्रसङ्गादस्माकं पुरुषसूक्तं सप्तर्चमत्र व्याख्यायते ॥

ad p. 6, r. 4—6. माषौ च वृषणवत् यवं च शिश्नवत् संनिवेश्य रेतोबिन्दुवदग्रगेन दधिबिन्दुना सहानेन मन्त्रेण प्राशयेत् ॥

ad p. 6, r. 7—8. फलाभ्यामुपहितं मूलतः संसक्तं न्यग्रोधशुङ्गं वटसमिदग्रं । तथा च वृषणोपहितशिश्नसदृशमिति यावत् ॥

ad p. 6, r. 8. एवं कृतमिदं कर्म निश्चयेन कुमारोत्पत्तये स्यादिति पूर्वाचार्या आचक्षते ॥

षष्ठः खण्डः ॥

ad p. 6, r. 10—11. श्व इत्यादि नान्दीमुखदिनात्पूर्वेद्युर्वा । नान्दीमुखदिने एवान्नं संस्कृत्य तदनन्तरं वा इत्यर्थः ॥

ad p. 6, r. 12—15. दध्यादिभिश्चतुर्भिः शुक्लद्रव्यैरष्टाभ्यो देवताभ्यः प्रतिद्रव्यमेकैका पङ्क्तिरिति चतुर्धा हरति । नमःशब्दस्य पृथक्पृथग्योगः । अग्न्यायतने यत्राग्निः प्रणेष्यते तत्रेत्यर्थः ॥

ad p. 6, r. 16. माषाशनेन मत्स्याशनेन मांसाशनेन भक्ष्याशनेन वा मिश्रयेदित्यपरं मतमित्यर्थः ॥

सप्तमः खण्डः ॥

ad p. 7, r. 2—3. आ मूर्ध्नः मूर्धपर्यन्तं । प्राणसंमितं नासमभिकृत्य । सीमन्तं केशविभागं प्रत्यङ्मुखस्तिष्ठन्कुर्यात् । मन्त्रे विभजामीति शेषः । प्रतिमन्त्रं सकृत्सकृदिति ग्राह्यः ॥

ad p. 7, r. 5. परा अन्या भार्येत्यर्थः ॥

अष्टमः खण्डः ॥

ad p. 7, r. 7—10. जातरूपेण समांशसुवर्णेन शिलादौ संक्षोभ्य बालं प्राशयेत् । इदं व्रीहियवमन्नमयं सुवर्णशकलो रसः इदं

सुवर्णा प्राणेनान्नस्य प्राणायात्तेन सह सहितममृतं पिबेति शेषः । पृथिवीत्यादि द्यौरादित्यस्तदन्तर्वर्ती पुरुषः पिता तद्वीर्यत्वाद्वर्षस्य तस्य धात्री पृथिवी माता । तस्याः खल्वोषधीशरीरेणास्य पूर्वं जननं । ततो ऽन्नरूपेण । ततः शुक्ररूपेण । ततः क्रमाच्छरीरत्वेन । ततो ऽस्य पितुरेव स्तनौ व्रीहियवौ । तौ हैतौ प्रजापतेः स्तनौ यद्व्रीहियवश्चेति श्रुतिः । हिरण्यं च प्राजापत्यो रस इति । शतं शरदः शतं संवत्सरान् जीवाहि जीव । पश्याहि पश्य ॥

ad p. 7, r. 16. वाक्यद्वयमेतत् । पुत्रं प्रत्याह पूर्वं कतमो ऽसि त्वमस्मिन् जन्मनि । सं समस्तगुणैर्मा मां संप्रविशानुकुरु । असावित्यस्य स्थाने आश्विनेत्यादि नाक्षत्रं नामास्य संबुद्ध्या निर्दिशेत् ॥

ad p. 7, r. 18. पशूनां हिंकारः सामात्मकतया शुद्ध इति ॥

ad p. 7, r. 19— p. 8, r. 3. तण्डुलावयवाः फलीकरणाः । लौकिकाग्नावौपासनवद्धोमः । शण्डादयो ऽष्टौ बालघातिग्रहाः । चतुर्थीत्रियं प्रथमार्थे । तथालिखन्विलिखन्नित्यादि दश । अर्यम्णः शत्रुः कुम्भीत्येकः । निपुणाह्वा अल्लीमुख इति पदच्छेदः । एते सर्वे इतःप्रदेशान्नश्यन्त्विति ॥

ad p. 8, r. 3. सूतकौ सूतकवन्तौ ॥

ad p. 8, r. 3—4. उत्थानमशुचित्वान्मोक्षः ॥

नवमः खण्डः ॥

ad p. 8, r. 5. द्वादश्यां जन्मदिनाद्द्वादशे दिवस इत्यर्थः ॥

ad p. 8, r. 8. (अनुनक्षत्रं) यथा कथंचिदस्य जन्मनक्षत्रसंबन्धसहितं वा । यथा मुकृत्तिकः अग्निमित्रः मेष इति ॥

ad p. 8, r. 8. (अनुदैवतं) देवतासंबन्धसहितं वा । यथा केशवः शंकर इत्यादि ॥

ad p. 8, r. 8. (अनुनाम) पित्रादेर्नामानुगतं वा । यथा विश्वामित्रः पराशर इत्यादि ॥

ad p. 8, r. 8. (अतद्धितं) सर्वत्र तद्धितान्तवर्ज्जम् ॥

ad p. 8, r. 8. (आकारान्तं स्त्रियै) विहितं नामैव स्त्रियै चेदाकारान्तं कुर्यात् स्त्रीप्रत्ययोपलक्षणमेतत् । यथा जया शंकरीत्यादि ॥

ad p. 8, r. 8—9. (यथार्थं वा) उक्तसर्वविशेषानपेक्षया यथार्थमर्थानुरूपं ज्योतिर्दशाभाविकर्मनिर्णाये यो ऽर्थो ऽभिलषितो ऽभिधातुं तदभिधानसमर्थं वा नाम कुर्यात् । यथा सुयज्ञः पुण्यकीर्तिः महामतिरिति ॥

ad p. 8, r. 9. (कुमारयज्ञेषु च) नामकर्मार्थं वक्ष्यमाणदशाहुतयो होतव्या इत्यर्थः ॥

ad p. 8, r. 9. नामाधानानन्तरं कुमारस्य जन्मनक्षत्रं तद्दैवतं जन्मतिथिं च यजते । तेभ्यः स्वनामभिर्जुहुयात् ॥

ad p. 8, r. 10—11. जुष्टाः सेविताः सर्वैरित्यर्थः । अग्निधन्वन्तरिभ्यां स्वाहा प्रजापतये स्वाहेत्यादि सप्ताहुतयः ॥

एकादशः खण्डः ॥

ad p. 8, r. 16. जटा इति शिखाशब्दवाच्याः केशाः ॥

ad p. 9, r. 1. स्फाण्डं (sic) सह क्वथितम् ॥

ad p. 9, r. 7. दर्भपिञ्जूलीति दर्भद्वयमूलप्रदेशः ॥

ad p. 9, r. 8—9. कतिचिच्छिन्नान् केशान् सदर्भपिञ्जूलीकान्सव्यहस्तेनानेन मन्त्रेण धारयेत् । सुवत्तवै सुखेन वपनं कर्तुमित्यर्थः ॥

ad p. 9, r. 13—14. तथेति चार्थे । एताभ्यां मन्त्राभ्यां क्रमात्पश्चादुत्तरतश्च एवमेव छिन्द्यात् क्षुरादानं विना सर्वमावर्तेतेत्यर्थः । तदिति पूरणः । अयं कुमारस्त्वं येन क्षुरेण कृतवपनः भूयः

दीर्घकालं चराति अस्मिन्लोके चरिष्यसि ज्योक् चीरकालं च सूर्यं पश्याति द्रक्ष्यसि च ॥

ad p. 9, r. 18. एकार्षेयाणामेका चूडा त्र्यार्षेयाणां तिस्र इत्यादि गोत्रकल्पः । कुलकल्पस्तु पित्रादिभिराश्रितः प्रकारः । तथा नापितं बोधयेदिति शेषः ॥

ad p. 9, r. 19. पश्चाद्वपनस्नानानन्तरं प्रधानाहुतयः ॥

ad p. 10, r. 2—3. धान्यपल्वले धान्यक्षेत्रे । निखनेत् निगूहेत्क-र्मकरः ॥

द्वादशः खण्डः ॥

ad p. 10, r. 5—6. अतिक्रान्तषोडशवयस्कं ब्राह्मणं नोपनयीत । अनियतेन्द्रियतया स्वेष शूद्रप्रायो भवतीति ॥

ad p. 10, r. 8—14. हे सोम ब्रह्मणा मन्त्रेण महे महते श्रोत्राय श्रोत्रियत्वाय परिदध्मसि परिधानवस्त्रं करोमि । इमं यथा जरिमा जरा अशक्तिः न यात् न प्राप्नुयात् यथा च ज्योक् सदा श्रोत्रे श्रोत्रियत्वे अधिजागरादधिकं जागरूको भवेत् तथा त्वमनुगृह्णीष्वेति शेषः । ण यादिति सांहितं णत्वं । अथ कुमारं प्रति जीवाहोत्यादि व्याख्यातं । राष्ट्राय राज्यरक्षायै । हे पोषेति पोषाधिष्ठात्रीं देवतां प्रति । पोषाय पुष्ट्यै समृद्ध्यै ॥

ad p. 10, r. 18. द्विपन्त (sic) इत्यकारान्तं प्रथमैकवचनं द्विप-न्नित्यर्थः (!) ॥

ad p. 11, r. 1—4. वः तुभ्यं । अदृष्टाय बृहते परमात्मने नमः करोमीत्यन्वयः । लिङ्गात्कुमारेण वक्तव्यो मन्त्रः ॥

ad p. 11, r. 4. (अधिगन्तरधिगच्छ) अधिगन्तव्यमिति शेषः । एव-माचार्यः कुमारं ब्रूयात् ॥

ad p. 11, r. 4—5. इत्थमाचार्यं कुमारो ब्रूयात् । असावित्यत्राचार्यनाम संबुद्ध्या अमुष्मै इत्यत्रात्मानं चतुर्थ्या च निर्दिशेत् ॥

ad p. 11, r. 6—7. आचार्याञ्जलिगतानामपां नीचैःस्राविणा इतरस्य शिष्याञ्जलेः पूरणं स्यात् । इदमुदकप्रदानरूपेण गुरोर्वेदप्रदानप्रतिज्ञानम् ॥

ad p. 11, r. 7. एनमाचार्यं कुमारः संशास्ति प्रार्थयति ॥

ad p. 11, r. 9—10. सु मर्त्य प्रयुयोतन प्रमिश्रय भगवन्वयं तु आगत्वा अस्मानागच्छता सह समगन्महि संगच्छेमहि ॥

ad p. 11, r. 12—14. स त्वं मा विस्रसः मा विश्लथितो भव । हे अमृत । रुलोपः सवर्णदीर्घश्च छान्दसः । मृत्योरन्तरं प्रवेशरन्ध्रं च मा कुरु ॥

ad p. 11, r. 14—17. हृदयदेशमालभ्य जपति नाभेरविच्छेदेन दक्षिणामंसमन्ववमृश्य ततो हृदयदेशमालभ्य कुमारस्य इमं मन्त्रं जपति आचार्यत्वेन व्रते मयि मम वाचं वेदमयीमेकव्रतः अचञ्चलब्रह्मचर्ये त्वां मयि नियुनक्तु नियोजयतु मद्वश्यं करोत्वित्यर्थः ॥

ad p. 12, r. 8—10. (ऋतस्य etc.) ऋतस्य आश्रमधर्मस्य गोप्त्री तपसश्च परस्पी पालयित्री अरातीश्च शत्रून्सहमाना प्रसह्य वर्तमाना मा रिषाम मा नश्येम भर्तारो धर्तारः । शिष्टं स्पष्टम् ॥

ad p. 12, r. 12. कौपीनं कटिवस्त्रं चान्तरं तत्क्षौमं वा शणसंबन्धि वा स्यात्सर्वेषामित्यर्थः ॥

ad p. 12, r. 18. भिक्षावाक्ये क्षा इति च हि इति चाक्षरे न वर्धयेन्नोच्चैर्ब्रूयात् । नीचैस्तरामितरवर्णेभ्यो ब्रूयादित्यर्थः ॥

ad p. 13, r. 3—4. (अनूच्य etc.) एवमुक्तो वटुः सावित्रीमनूच्य वेदमादितः किंचिदेकसामावरमृक्पूर्वमाचार्यादधीत्य पठिष्यमाणैश्चतु-

भिर्मन्त्रैश्चतस्रो घृतेनाक्ताः समिधो ऽग्नावादध्यात् । उपनयनप्रभृत्यासमावर्तनपर्यन्तं यद्ब्रह्मचर्यं तद्व्रतमात्र एभिर्मन्त्रैरादिश्यते । तदिदं षोडशे गोदानकरणे विसृज्य पुनरपि तत्रापोद्धृत्य स्नानमादिशयेतेति विधास्यति (cf. p. 17, r. 1) । समावर्तने त्वस्यात्यन्तविसर्गः । इदं विसृज्यैव गौदानिकाद्यन्तरालव्रतादेशः ॥

ad p. 13, r. 8. तदेतन्मन्त्रचतुष्टयेन समिदाधानं वस्त्रादेरप्युपलक्षणं सर्वत्र गौदानिकादिव्रतोपक्रमे ऽपि कर्तव्यम् ॥

ad p. 13, r. 9—10. व्रतसमाप्तावत्रादिष्टस्य महतो व्रतस्य समाप्त्यर्थे समावर्तनाङ्गदण्डसादनात्पूर्वकाले गौदानिकादिसमाप्तौ च एभिर्मन्त्रैः समिध आधेयाः तदानीं च मन्त्रानेवमूहेदित्यर्थः ॥

ad p. 13, r. 12. (त्रिरात्रम् etc.) अक्षारमलवणं च भैक्षमाचार्यानुज्ञयाश्नीत ॥

ad p. 13, r. 13—14. अभ्यज्य आज्येनासिच्य । स्थालीपाकेन चरुणा व्याहृतिभिरिष्ट्वा तन्मूले हुत्वेत्यर्थः । यज्ञोपवीतं दण्डं च ब्रह्मचारिणास्तस्मिन्नेव पलाशे उत्क्षिप्य प्रत्येयात् प्रत्यागच्छेत् । ततश्च यज्ञोपवीतं दण्डं चान्यदाददीत ॥

त्रयोदशः खण्डः ॥

ad p. 13, r. 15—16. मार्जयेत आत्मानं प्रोक्षयेत् । तन्मध्ये सूर्यश्चाग्निश्चेति सायंप्रातर्मन्त्राचमनं स्मृतिसिद्धम् ॥

ad p. 13, r. 16. (वामदेव्यमन्ते) अन्ते वामदेव्यं प्रोक्षणमन्त्रः स्यात् । अन्तग्रहणमिदमन्यैरपि स्मृत्यन्तरसिद्धैः प्रोक्षणं तरत्समन्दीयादूर्ध्वं ज्ञापयति ॥

ad p. 13, r. 16—18. नक्षत्रोदयोपलक्षितकालादधि सन्ध्यां परमात्मानमादित्यान्तर्वर्तिनं ध्यायेदित्यर्थः । स्मृतिसिद्धार्घ्यदानानन्तरकृ-

त्यमेतत् । प्रातर्विशेषो वक्ष्यते (p. 13, r. 21) । सायमप्येवो ऽयं विधिः ॥

ad p. 13, r. 18—19. प्राणायामप्रकारस्तु सव्याहृतिकमित्यादि मनूक्तः (cf. Mānavadharmaśāstra VI. 70; II. 78) । स्मृत्यन्तरसिद्धतर्पणानन्तरकृत्यमेतत् । आवर्तयेत् पठेत् ॥

ad p. 13, r. 19. (शतकृत्वो वा दशावरम्) दशावृतस्त्ववरं मतमित्यर्थः (B: दशावृत्तयस्त्ववरम्मत°) ॥

ad p. 14, r. 1—2. यस्मिन्सुप्ते ऽनुत्थिते सूर्य उदेति स सूर्याभ्युदितः । यस्मिन्सुप्ते ऽनुत्थिते सूर्यो निम्रोचति अस्तमेति स सूर्याभिनिम्रुक्तः । तच्छेषं तस्मात्सुप्तिकालादह्नःशेषं रात्रिशेषं वा ॥

चतुर्दशः खण्डः ॥

ad p. 14, r. 4. श्रवणसमवस्थितचन्द्रयुक्तपौर्णमासी श्रावणी । तथा प्रौष्ठपदी । वर्षापौर्णमास्योरन्यतरः स्यादित्यर्थः ॥

ad p. 14, r. 4. (हस्तेन) तन्नक्षत्रयोगिपूर्णिमाभावे संनिधानाद्वार्षिकेण हस्तेन उपाकुर्यादित्यर्थः ॥

ad p. 14, r. 4—6. सर्वे आचार्यः शिष्याश्च । पुरस्ताज्जप इत्युक्ता भूम्यालम्भजपात्प्रागेव कार्यः । अध्येष्यमाणो वेदः नः सहास्तु सर्वेषामधीनो ऽस्तु । तथा भुनक्तु परिपालयतु । तथा शेषमपि ज्ञातव्यं । मा विद्विषामहे वयं परस्परम् ॥

ad p. 14, r. 8—9. छन्दांस्याग्नेयैन्द्रपवमानानि । आदितः ऋक्पूर्वं । अधीत्य अध्याप्य । यथार्थं यथाशक्ति एकर्चावरमित्यर्थः ॥

ad p. 14, r. 9—10. ऋषिभ्यः स्वाहेत्यादिप्रकारेण । ऋष्यादीन् पठित्वा ऋचं सामेत्यादि ऋग्भिश्च तिसृभिस्तिस्र आहुतीर्जुहुयादित्यर्थः । ऋषय ऋक्सामद्रष्टारः । देवा ऋक्सामवाच्याः । छन्दांसि ऋक्सामयोर्यानि गायत्र्यादीनि । यजूंषि यानि सूत्रब्राह्मणमन्त्राणि ॥

ad p. 14, r. 10. एताभिरेव धानाभिः पूर्वाभिः षड्भिः षडाहुति-मन्त्रैरित्यर्थः । तानेव ऋष्यादींस्तृप्तिभाजः कुर्यात् । तानावाहनादिभिः संपूज्य हुतशेषा धानास्तेभ्यो निवेद्याचार्यः शिष्याश्च तानद्भिस्त-र्पयेयुः ॥

ad p. 14, r. 10—13. (आचार्यमाचार्यांश्च) आचार्यं जैमिनिमाचार्यां-स्तलवकारादीनेतांस्त्रयोदश ऋष्यादीनिव तृप्तिभाजः कुर्यादित्यर्थः ॥

ad. p. 14, r. 16. (सावित्रमहः काङ्क्ते) सावित्रमहः हस्तनक्षत्रं । तदेव पर्वदक्षिणा कर्माणि च काङ्क्ते केचिदाचार्याः ॥

ad p. 14, r. 16. (उत्सर्गे च) सावित्रमहः अन्यच्च कर्मजातमुपा-कृतिवदेव स्यात् ॥

ad p. 14, r. 16—17. (पक्षिणीं .... अश्नीयात्) पक्षिणीं पक्षतु-ल्यागामिवर्तमानाहर्युक्तां रात्रिमुत्सर्गे इति शेषः । आचार्यस्त्रैवे-तानि वर्णानि (sic) स्युः ॥

पञ्चदशः खण्डः ॥

ad p. 15, r. 1—2. यथास्वं स्वस्थानेषु । छन्दांसि गायत्र्यादीनि । चतुरुत्तराणीत्युपलक्षणमन्येषामपि शिवेन सहेति शेषः । नो अस्मानिति । इत्यमर्थाभि (?) सन्धिपुरःसरमुक्त्वा उत्स्रष्टव्यमित्यर्थः । ततश्च स्विष्टकृदादि हविःशेषप्राशनान्तमुपाकर्मवत् ॥

ad p. 15, r. 2—3. (उत्सृज्या° ... अधीयीरन्) अध्यायदिने ऽध्य-यनमनध्यायदिने तदभावश्च । उभयोरनुपालनं । यथास्वं स्वायत्तं (B: स्वायुक्तं) पठितमेव वेदावयवमित्यर्थः ॥

ad p. 15, r. 3. अतस्तैष्याः पूर्णिमाया ऊर्ध्वमभ्रेषु सत्सु मेघच्छन्ने ऽह्नीत्यर्थः । नाधीयते नाध्येतव्यम् ॥

षोडशः खण्डः ॥

ad p. 15, r. 4. गोदानसमाप्तिकं पवमानपर्यन्ताध्ययनमत्र गोदा-

नशब्देनोच्यते । व्रतानीति आरण्यपर्वादौ । दशाध्यायी उपनिषदिति । [1] तवशाव्यव्याहृतिसामगायत्राणि यदुपनयनादि षट् द्वादश वा वर्षान् [1] यावदध्ययनकालं वा ब्रह्मचर्यमिति वक्ष्यमाणकालमध्ये गोदानसमावृतसामोपनिषत् साम्नामध्ययनार्थास्त्रयः संवत्सरा भवन्ति । औपनिषदस्तु समानव्रतत्वादत्रोपात्तः वक्ष्यमाणादादित्यव्रातिकात् (p. 15, r. 6) परो विज्ञातव्यः । इदं च सूत्रं तत्तत्संवत्सरानुष्ठेयव्रतविधानार्थम् ॥

ad p. 15, r. 4—5. तेषु त्रिषु संवत्सरेषु उदकोपस्पर्शनं स्नानम् ॥

ad p. 15, r. 5. अनुपस्पृश्य अस्नात्वा प्रातर्भोजनं न कुर्यात् । भैक्षचरणादि त्वस्नातेनापि कार्यमिति भावः । दिनचतुर्भागे ऽत्र प्रातःशब्दः ॥

ad p. 15, r. 5. (साय° … आधानात्) न भुञ्ज्यादिति शेषः । भैक्षचरणं तु स्नानात्प्राक् समिदाधानादनन्तरमन्तरा वा स्नानसमिदाधानयोर्भवति । प्रदोषान्ते दिवसचतुर्भागे ऽत्र सायंशब्दः ॥

ad p. 15, r. 5—6. (अरण्यात् … °दध्यात्) सदा सायं समिदाधानमिति वक्ष्यमाणस्य (p. 16, r. 8) अयमेतद्व्रतविषयो गुणविधिः । इदं व्रतं गौदानिकनिमित्तत्वेन त्रिधं गौदानिकं व्रातिकमौपनिषदमिति तत्तत्संज्ञां च लभते । तथा च संवत्सरत्रयस्यादौ त्रिरादेशनमन्ते त्रिः समाप्तिश्च तदेतद्व्रतादेशनं सर्वत्रेत्यादि विधिः । तत्र व्रतादावग्ने व्रतपत इत्यादिमन्त्रेषु गौदानिकं व्रतं चरिष्यामि अन्ते अचारिषमित्यादि तत्तन्नामनिर्देशः । उपनयनादिष्टं सामान्यव्रतं तु सर्वेष्वनुसरति । एवमुत्तरत्र ग्राह्यं । अत्र औपासनवत्पूर्वोत्तरमन्त्रमध्ये व्रतसमिदाधानं

[1] Deze lastige zonder twijfel bedorven woorden zijn in M[2] zoo overgeleverd: अश्नात्व्याहृतिसामगायत्री .. (lacune) .. दिषुयद्वा दश वर्षान्

व्रतादौ तु पूर्वपरिषेकात्प्रागुपनयनवत् । वस्त्रोपवीतमेखलाजिनदण्डधारणं च प्रायः कुर्वन्ति । उपाकृतेः प्रागेव गौदानिकादेशः ॥

ad p. 15, r. 6. (आदित्यव्रातिकः संवत्सरः) आदित्यव्रतानि शुक्रियसामानि । उक्तकालमध्ये तदध्ययनार्थः संवत्सरो भवति । इदं तद्व्रतविधानार्थम् ॥

ad p. 15, r. 6. (एकवासाः) एकसदृशं वासो यावद्वसं वसीत ॥

ad p. 15, r. 6–7. (न युक्तमारोहेत्) युक्तमनोरथप्रभृति ॥

ad p. 15, r. 8. (नोर्ध्वं ... प्रस्नायात्) अपः प्रस्नायात् प्रस्यन्दयेत् । अशुचित्वनिमित्तं तु स्नानं भवति ॥

ad p. 15, r. 8–9. तस्मिंस्तस्मिन्संवत्सरे व्रते समाप्ते सति श्रावयेदध्यापयेदित्यर्थः । इति गौदानिकादीनि चत्वारि समाप्तानि ॥

सप्तदशः खण्डः ॥

ad p. 15, r. 10. महानाम्न्य इति विद्रा मघवन्निति शक्वरीत्रयं ससाम (वसामि M) । तदध्ययनार्थाः द्वादश संवत्सराः नव षड्वा । त्रयो वा संवत्सरा इति विविधास्तत्र कल्पा भवन्ति ॥

ad p. 15, r. 11. श्रुता अध्यापिता भविष्यन्ति चेदित्यर्थः ॥

ad p. 15, r. 11–12. शुक्लत्वमत्र शुचित्वं । विहिते काले संवत्सरमात्रमेव चरेत् ॥

ad p. 15, r. 12. (व्रतं...दिवा) व्रतं समग्रं चरन्दिवा भूयः बहुशस्तिष्ठेत् ॥

ad p. 15, r. 12. (अथासीत नक्तं) भूय इति शेषः ॥

ad p. 15, r. 12–13. (तस्य ... परिदध्यात्) अन्नं तु तदुक्तत्वद्वा भवत्विति भावः ॥

ad p. 15, r. 13. (रागदोषान्न कृष्णां) रागदोषादिहेतोः कृष्णां न परिदध्यात् ॥

ad p. 15, r. 14. उपस्पृशेत् स्नायात् । प्रत्यक्गमनेन (प्रत्यग्गमनेन M) या स्नानयोग्या यवृच्छया (°पृच्छया M)[1] संगम्यन्ते (संगम्यते M) तासु सर्वास्वित्यर्थः । अप इत्युक्त्वा अनुक्त्वा (zoo gecorr.; चयुक्त्वा B, अभुक्त्वा M) इति हेतोः । अस्ति हि श्रुतिः आपो वै शक्वर्य इति ॥

ad p. 15, r. 14. (नावा न प्रस्नायात्) नावा अपो न प्रविशेत् । अवतीर्यैव नद्यादिकं लङ्घयेदित्यर्थः ॥

ad p. 15, r. 14—15. (प्राण° … उभयतः) प्राणसंशये तु नावैव लङ्घयन्नुभयतस्तीरयोरुपस्पृशेत् स्नायात् ॥

ad p. 15, r. 15. उभयत इति शेषः । पशूक्त्वा इति । अस्ति हि श्रुतिः पशवो वै महानाम्न्य इति ॥

ad p. 15, r. 15—16. प्रतिवृष्टि गृहान्निर्गतः किंचित्क्लिन्नो गृहं प्रविशेदित्यर्थः ॥

ad p. 15, r. 16—17. (एवमस्य … उपोषितः) ब्रह्मचर्यान्ते महानाम्नीब्रह्मचर्यान्ते इत्यर्थः । एकरात्रं एकमहोरात्रमुपोषितः स्यादिति शेषः ॥

ad p. 15, r. 17—19. (अरण्यं … सपुरीषाः) तस्मिन्नुपोषणादिने । आचार्यकृत्यमेतत् । अपामद्भिरित्यर्थः । तं ब्रह्मचारिणमुपवसन्तं । समनुपरिगृह्यालिङ्ग्य । निमीलितं मीलिताक्षं कृत्वा । स्तोत्रियाः स्तोत्रियसामसहिता महानाम्नीः । उपगायेत् अध्यापयेत् । एवा ह्येवेत्यादि पञ्च पुरीषपदानि ॥

ad p. 15, r. 19—20. शिष्यो ग्रामं प्रत्येत्येति शेषः ॥

[1] Te lezen: यदृच्छया

ad p. 15, r. 20— p. 16, r. 1. (रात्रिम° ... वाग्यतः) उदपात्रं धारयन्निति शेषः ॥

ad p. 16, r. 1—2. (श्वो° ... वेष्टयेत्) आचार्यकृत्यं । श्वो भूते प्रभाते । वासः मुखवेष्टनवस्त्रम् ॥

ad p. 16, r. 2. (उन्मथ ... वीक्षेत्) ता एवापः । ब्रह्मचारिकृत्यम् ॥

ad p. 16, r. 2—4. (स्वर° ... °पहरेत्) अपः कांस्यगताः । प्रकृतमेव वासःप्रभृति । उपहरेत् दद्यादाचार्याय गृहं गताय ॥

ad p. 16, r. 4—5. स्थालीपाकात् हविषेत्यर्थः (sic) । पुरस्तात्त्वान्त इदमिति व्रतसमाप्तिद्योतकः । तस्मादत्रैव व्रतान्तसमिध आधाय स्विष्टकृदाद्युत्तरतन्त्रम् ॥

ad p. 16, r. 6—7. (गौर्दक्षिणा) दत्तस्य वत्सस्य माता गौरेव दीयते । महानाम्नीकव्रतं समाप्तम् ॥

अष्टादशः खण्डः ॥

ad p. 16, r. 7. वेदार्थं ब्रह्मचर्यं यदुपनयन आदिष्टं तद्द्वादश वर्षाणि चरितव्यम् ॥

ad p. 16, r. 7. (जननात् .. एके) तथा चोपनीय (तथा चोपरि M) षड्वर्षाणीत्यर्थः । सप्तमे ह्युपनीयते ॥

ad p. 16, r. 7—8. (यावदध्ययनं) ब्रह्मचर्यचरणमिति शेषः ॥

ad p. 16, r. 8. (सदा ... आधानं) औपासनवत्तन्त्रं । अग्नये समिधमित्याद्युपनयनवदाहुतिः ॥

ad p. 16, r. 8—9. द्वे त्रिवृती त्रिप्रकारे वस्तुनी केते इति चेत्त्रिवृतं मणिं त्रिगुणे उपानहौ च वर्जयेत् ॥

ad p. 16, r. 9. (षोडशे गोदानकरणं) गोदानमिति केशान्तक-

रणां तत्संस्कारः । तदस्मिन्याकयज्ञे इति । तद्गोदानकरणमिदमपि वृणोति ॥

ad p. 16, r. 9—10. (तत् . . . आचक्षते) अत एवोपनयनाच्चैताव-त्कालं केशा धार्या इति ज्ञायते । ब्रह्मचर्यान्ते एतत्कर्म । पञ्चमे चोपनयने तदादि द्वादश वर्षाणि ब्रह्मचर्यं तन्मध्ये चानुकल्पाश्रयेण महानाम्नीसमाप्तौ मेधाविना च अध्येतव्यज्ञातस्य सर्वस्याप्यध्ययने चार्थादिदं षोडशे भविष्यतीति मुख्याभिप्रायेणेदं (मुख्यान्तप्रा° M) षोडश इत्युक्तं पक्षान्तरेण तदाग्वापरं (sic B; तदन्याग्वापरं M) वा यथाकथंचित् ब्रह्मचर्यावसान एवेदं कुर्यात् ॥

ad p. 16, r. 11. अविकृतं विहृपान्तहोमान्तं कर्तव्यं । स्नानी-यादि(भि)श्च प्रोक्ष्य इति विशेषः ॥

ad p. 16, r. 10—11. (उपनयनेन व्रतादेशनं) वक्ष्यमाणमपोहृत्य स्नान-मादिशयेतेति (p. 17. r. 1) आदेशनमुपनयनेन व्याख्यातमिति शेषः । तदेतद्व्रतादेशनं सर्वत्रेति सिद्धे इदमुपनयनादिष्वस्य महतो व्रतस्येह निवृत्तिं ज्ञापयति । अतो विहृपान्ताद्युत्त्यनन्तरं व्रतान्तसमिध आ-धेयाः । पुनरादेशकान्तं तु वक्ष्यत्यपोहृत्य स्नानमादिशयेतेति ॥

ad p. 16, r. 11. (न विह . . . वासः) इह व्रतादेशे ऽहतं वासः न नियुक्तं न नियतं । अस्तु वा मा वेत्यर्थः । अत एव सर्वत्र व्रतादेशेषूपनयनवन्नूतनवस्त्राद्यस्तीति ज्ञायते ॥

ad p. 16, r. 11—12. (सर्वाणि . . . औद्गाहमनिः) समिदाधानादन-न्तरमुदकदानाद्या (sic M; °मुदगादानाद्याः B) वपने वयं विशेषः । औद्गाहमनिराचार्यः । आचार्यग्रहणं पूज्ञार्थम् ॥

ad p. 16, r. 12. (उप्तकेशः स्नायात्) उप्तकेशः धान्यपल्वले गोष्ठे वा निखातकेशः ॥

ad p. 16, r. 12—14. वनस्पतीनां चर्मणा संपिष्टेन स्नानीयेन । वनस्पतेस्त्वगसि त्वं दे शोधनि मा शोधय । तां त्वाभिक्ले धारयामि ॥

ad p. 16, r. 15. (स्नात्वा° . . . कुरुते) कुरुते आत्मानमलंकुरुते । देवेषु मनुष्येषु च मध्ये मे पुण्यं गन्धं कुरु । शिष्टं स्पष्टम् ॥

ad p. 16, r. 19— p. 17, r. 1. आदर्शो ऽसि त्वं देवमनुष्या उभये मामादृश्यासन्नादरेण दृश्यासुः । शोभो ऽसि शोभयितासि त्वं देवेषु मनुष्येषु च मध्ये अहं शोभासं शोभिषीय । रोचो ऽसि रोचयितासि त्वं देवमनुष्येषु अहं रोचासं रोचिषीय ॥

ad p. 17, r. 1. (अपोद्धृत्य . . °देशयेत) अपोद्धृत्य अपनीय स्नानस्याचार्य आदेशयेत व्रतसमिध आधापयेत् । एतत्कर्मादौ निवर्तितस्य व्रतस्य पुनरत्राधानं । कुतः ॥

ad p. 17, r. 1—2. (उक्ता . . . संवत्सरेषु) प्राक्संवत्सरेषूक्ता एवात्रापि नियमा न नूतनमिति भावः । तत उत्तरतन्त्रं प्रायश्चित्तान्तं कृत्वा मूर्धारम्भत्रयः ॥

एकोनविंशः खण्डः ॥

ad p. 17, r. 3—5. स्नास्यन्यथाशक्ति दक्षिणां दत्त्वा गुरुणानुमतः समावर्तनं करिष्यमाण इत्यर्थः । स्नानं स्नानीयं । शुक्ले अनुपभुक्ते उपानहौ ॥

ad p. 17, r. 5. उपक्लृप्तः संनद्धः ॥

ad p. 17, r. 6—7. पूर्वतन्त्रान्ते व्रतान्तसमिध आधायानन्तरकृत्यमेतत् । आस्तीर्य पश्चादग्नेरिति शेषः । अप्सु तत्रैव पात्रावस्थितास्वप्सु ॥

ad p. 17, r. 8. (तां . . . पादयेत्) आचार्य एव ॥

ad p. 17, r. 8. (केशान्त° . . . व्याख्याताः) वक्ष्यमाणस्नानीयानुलेपनसुमनआदर्शान्वनस्पतेस्त्वगसीत्यादिमन्त्रैर्विनियुञ्जीतेत्यर्थः ॥

ad p. 17, r. 9. (परिवापनं च) वक्ष्यमाणवपने प्रकारश्च मेखलां सादयित्वा महाव्याहृतिभिर्वित्रपात्रेण च हुत्वा सर्वौषधीभिरित्यादिकृत्यं । तत्रायं विशेषः ॥

ad p. 17, r. 9—11. शिष्यकृत्यमेतत् ॥

ad p. 17, r. 11—12. आचार्यकृत्यमेतत् । हे सरस्वति नः शिवा शंतमा शोभनतमा भव । सुमृडीका सुखकरतमा भव । ते तव व्योम व्यापकं परं धाम मा संदृशि मां प्रति संदर्शनाय भवतु ॥

ad p. 17, r. 18—19. स्नानीयगन्धस्रजां गोदानकरणवद्विनियोगादनन्तरकृत्यमेतत् । अन्तरीयमात्रस्य परिधानमत्र ॥

ad p. 17, r. 19—20. (सव्य° . . . दक्षिणां) तयैव ऋचा । मा मां द्यावापृथिवी यशसा संयोजयतां । इन्द्रबृहस्पती भगेन भाग्येन संयोजयतां । भगस्य यद्यशस्तन्मां विन्दतु । यशः मा मां प्रतिमुच्यतां न विमुञ्चतु । यशस्वी अहं अस्याः संसदः प्रवदिता प्रकर्षेण वाग्मी स्यां भवेयं । अस्याः संसदः अहमुत्तमश्च भूयासमित्यर्थः ॥

ad p. 17, r. 20. (त्रिवृतं . . . °मुञ्चते) आदर्शमादर्शो ऽसीत्यादिमन्त्रेणावेक्ष्य धृतोत्तरीयस्येदमुच्यते । प्रतिमुञ्चते सूत्रप्रोतमासञ्जयति ॥

ad p. 17, r. 20—21. पालाशं त्रिवृतं मणिं । स्वस्त्ययनकामः सुखजीवनकामः ॥

ad p. 17, r. 21— p. 18, r. 2. अर्कवानन्नवान् । पालाशमेवैषां मुख्यम् ॥

ad p. 18, r. 3. (उपानहाव° . . . मामिति) करेण युगपदादधीत (sic) ॥

ad p. 18, r. 3. अथ सव्यमिति शेषः । नेत्रे नेत्रिणी इत्यर्थः । अथोत्तरतन्त्रः समूर्धारम्भजपः सगोदक्षिणः समाप्यते ॥

ad p. 18, r. 3. (तस्य ... भवन्ति) यावज्जीवमिति शेषः ॥

ad p. 18, r. 4. (नाग्नात° ... इच्छेत्) स्वभावाद्वाल्याद्वा नाभिरधो यस्या न लोमानि तया उपहास्यतीति (उपहास्यंतीति M) उपहासं मैथुनं नेच्छेत् न तादृशीं परिणेतुं कामयेतेत्यर्थः ॥

ad p. 18, r. 5. (न फलानि... °चिन्वीत) वृक्षादिभ्य इति शेषः॥

ad p. 18, r. 6. (नैकः) ग्रामान्तरं व्रजेत् ॥

ad p. 18, r. 6. (न वृषलैः सह) ग्रामान्तरं व्रजेत् ॥

ad p. 18, r. 6—7. (न संक्रममारोहेत्) संक्रमश्चक्रमं पिण्डशिला वा (sic; de Comm. op dit sutra ontbreekt in M) ॥

ad p. 18, r. 7. (नान्तर्धायासीत) आसनादिभिर्भूमिमनन्तर्धायाना-ह्याय ॥

ad p. 18, r. 7. (नापरया ... अश्नीयात्) अपरया द्वारा गृहस्या-प्रधानद्वारेण प्रपन्नमानीतम् ॥

ad p. 18, r. 7. (न शुक्तं) शुक्तं गतरसम् ॥

ad p. 18, r. 8. (न द्विःपक्वं) गतोष्णस्योष्णतावाप्तये ॥

ad p. 18, r. 8—9. (न पर्युषितम°... °घृतेभ्यः) पर्युषितं पुरा-तनं शाकादिभ्यो ऽन्यत्र तानि विनेत्यर्थः। यवान्नपिष्टान्नादीत्यन्वयः। फाणितं शर्करा ।

ad p. 18, r. 9. (शुक्ता ... भाषेत) शुक्ताः परेषां प्रीतिकरीः ॥

ad p. 18, r. 10—11. अशक्तया अव्रतो ऽधीतवेदस्नातो विद्यास्ना-तकः। अबुद्धा अवेदो ऽनुष्ठितव्रतस्नातो व्रतस्नातकः । अधीतवेदो ऽनुष्ठितव्रतस्नातश्च विद्याव्रतस्नातकः ॥

ad p. 18, r. 11—12. (तेषा°.. श्रेष्ठः) उत्तमस्तृतीयः विद्याव्रत-स्नातकः ॥

ad p. 18, r. 12—13. (स्नात्वा° . . . °नयवितिं) स्नात्वा एवं स्नानाख्यं पाकयज्ञं निर्वर्त्य ॥

ad p. 18, r. 13. (आचार्यकल्पो वा) आचार्यस्य पुत्रादिर्वा तथा वाच्य इत्यर्थः ॥

ad p. 18, r. 13. (तस्मै . . . आहरेत्) आचार्यस्तत्कल्पो वेति शेषः ॥

ad p. 18, r. 13—14. विष्टरमासनकूर्चं दद्यादिति शेषः ॥

ad p. 18, r. 15. शूद्रा चेदस्य पादं प्रक्षालयेत ॥

ad p. 18, r. 16. (मयि वर्च . . . °ह्वीयात्) परमेष्ठी प्रजापतिः मयि वर्चश्च गन्धश्च । अथो अथ । यज्ञस्य यत्पयः यो रसः तत्सर्वं दिवि आकाशे द्यां सूर्यमिव दृंहतु दृढीकरोतु ॥

ad p. 18, r. 16—17. (आचमनीयाभि° . . . अधस्तात्) यस्मिन्नच्यते तच्चमसं । पात्रचमसं चमसपात्रं भक्षणपात्रमित्यर्थः । अधस्ताद्विष्टरेण तृणकूर्चेण उपहितं संसक्तं भवति ॥

ad p. 18, r. 17. (विष्टरौ . . . भवतः) प्रागेव तौ द्वौ विष्टरौ संहिताग्रौ संबद्धाग्रौ भवतः यश्चमसस्याधस्तान्निहितो यश्चोपरि निधास्यते ॥

ad p. 18, r. 18. (एक° . . . उत्तरतः) उत्तरतश्चमसस्योपरि निधातव्यः ॥

ad p. 18, r. 18. (तयो° . . . भवतः) दधि च मधु च तयोर्विष्टरयोर्मध्ये यथा भवेतां तथा तौ विष्टरौ कृत्वा संनिहिते अन्तश्चमससिक्ते भवतः । इदमितरयोर्मधुपर्कयोरुपलक्षणम् ॥

ad p. 18, r. 18—19. (दध्ना . . . °मन्थः) दध्ना चेन्मधुसंनिहितं स दधिमन्थनामा मधुपर्कः ॥

ad p. 19, r. 3. (परः ... गौरिति) परः अन्यः । स्वधितिपाणिः खड्गपाणिर्भूत्वा । गां तस्मै स्नातकाय दत्त्वा दर्शयित्वाह ॥

ad p. 19, r. 3—4. (ताम° ... धेनुरिति) गौर्धेनुरित्यादिमन्त्रेण तामभिमन्त्र्य ॥

ad p. 19, r. 4. (कर्तव्या ... ब्रूयात्) कर्तव्या भोजनार्थं संस्कर्तव्या चेत् । कुरुतेति संस्कुरुतेति ब्रूयात् । न त्वभिमन्त्रयेत ॥

ad p. 19, r. 4—8. इति मन्त्रः । गौः धेनुः पातव्याक्षीरा । हव्या हविर्योग्या ॥

ad p. 19, r. 7—8. विष्टरादिगवान्तमिहार्घ्यशब्देनोच्यते ॥

ad p. 19, r. 8. (तेभ्य ... कुर्यात्) आतिथ्यमतिथिभोजनभूतां गामर्घ्यादिरप्युपलक्षणां कुर्यात् संस्कुर्यात् अनुत्सर्गे सति ॥

ad p. 19, r. 8—9. तां संस्करिष्यमाणां गामतिथये त्वा जुष्टं प्रोक्षामीत्यनेन सावित्रेण प्रोक्षेत् ॥ इति समावर्तनम् ॥

विंशः खण्डः ॥

ad p. 19, r. 10—11. अनग्निकां यस्मिन्वयसि स्वयमेव लज्जया वासः परिदधाति तद्वयस्कां । समानजातीयामसवर्णां मातुरसपिण्डां मातुरर्धशरीरत्वात्पितुरप्युपलक्षणां । संगतः पिण्डे शरीरो यस्याः सा सपिण्डा । वरस्य मात्रा पित्रा च रक्तधातुसंबन्धरहितामित्यर्थः । तच्च सापिण्ड्यं सप्तपुरुषमितिवत् सप्तमे शरीरे निवर्तते । तथा च मातुलदुहितुर्दुहिता पितृष्वसृदुहितुर्दुहिता इत्येवमादयः अपरिग्राह्याः मातुः स्वपित्रा तस्य स्वपुत्रेण तस्य स्वदुहित्रा तस्याश्च स्वदुहित्रा धातुसंबन्धो ऽस्तीति मातुलदुहितृदुहिता मातुः पञ्चमीति त्याज्या । एवमन्यत्राप्यूह्यम् ॥

ad p. 19, r. 11—12. (ज्यायसः कनीयसीं) ज्यायसः वयसा ज्येष्ठतमस्य वरस्य । कनीयसीं वयसा यवीयसीं जायां कुर्यात् ॥

ad p. 19, r. 12—14. इतं दुहितृमतिप्रदाननिर्णयाय प्रस्थास्यमानं गणपतिसंकल्पस्य सत्यं कुरु । नान्दीप्रतिसरानन्तरकृत्यमेतत् ॥ अनृक्षराः अशर्कराः । ऋजवः पन्थाः पन्थानः सन्तु । एभिः पथिभिः नः सखायः वरेयं कन्यागृहं यन्ति प्राप्नुवन्ति । अर्यमा च नः समनुनीयात् भगश्च नः समनुनीयात् । हे देवाः जास्पत्यं जायापत्यं सं सम्यक् सुयममस्तु सुकरमस्तु ॥

ad p. 19, r. 14—16. इत्यकृत्यानुष्ठानस्वस्तिवाचनकन्याविश्मगमनमधुपर्कग्रहणसंभारकल्पनानन्तरकृत्यमेतदनुमन्त्रणम् ॥

ad p. 19, r. 19. पूर्णपात्रनिधानानन्तरकृत्यमेतत् प्रोक्षणाख्या कर्मसमाप्तिः ॥

ad p. 19, r. 20. (मातु° . . . मात्री) मातुरभावे अशक्तौ तन्मात्री तत्सदृशा धारयेत् । मातुः स्वसा मतामही वा ॥

ad p. 19, r. 21— p. 20, r. 1. एवंजातीयं एवंप्रकारमन्यद्वा आस्तरणं कशिपु कम्बलादि । यथा संवेशनकाले प्रसार्यमाणं परिस्तरणबर्हिषः पश्चार्ध प्राप्नोति स्पृशति ॥

ad p. 20, r. 1—3. अथ समुपनिहितं देवस्य त्वेति प्रोक्ष्यानन्तरमेवास्यै वाससी ददाति । प्रतिवासो मन्त्रावृत्तिः । याः देवीः देव्यः इदं वास अवयन् तन्तुसंतानं कृतवत्यः । या अतन्वत विस्तारितवत्यः । या अकृन्तन् खण्डितवत्यः । या अभितः अन्तान् (zóó is ook de tekst te verbeteren) दशाः अददन्त कृतवत्यः । तास्त्वा देवीदेव्यः जरसा सह संव्ययन्तु संयोजयन्तु । आयुष्मतीत्यादि स्पष्टम् ॥

ad p. 20, r. 3—4. परिहितोपसंवीतवस्त्रद्वयां आचान्तोपसन्नां वधूमग्न्यात्मनोर्मध्येन नीत्वा उपवेश्य श्रीसूत्रेण मङ्गल्यसूत्रं बद्ध्वा भूषणान्यलंकृत्य प्रत्यङ्मुखः श्वशुरेण संकल्प्य यथाशक्ति दत्त्वा गो-

त्रनामपुरःसरं दत्तामिनामुपवेश्य । भूम्यालम्भादिपुरस्तान्त्रः आज्यानन्तरं लाजानां वा इत्युत्पवनं । तन्त्रान्ते एरकां प्रसार्यानन्तरमिदं । अभिजहि आरोहेत्यर्थः ॥

ad p. 20, r. 4—5. (प्र मे … कल्पतामिति) वधूरेरकां प्राङ्मुखी आरोहति ॥

ad p. 20, r. 5. (अजपत्यां . . . प्रास्या इति) प्र मे इत्यादि तस्यामजपत्यां वरः स्वयं प्रास्याः पतियानः पन्थाः कल्पतामिति जपेत् ॥

ad p. 20, r. 5—6. (दक्षिणतः … पतिः) उपविशेदित्यर्थः ॥

ad p. 20, r. 6. (उभावन्वारभेयातां) उभौ दम्पती तामेरकामन्वारभेयातां सहैवारोहेताम् ॥

ad p. 20, r. 8—19. संराधा नाम देवता सा च पृथिव्यात्मिका सात्रोच्यते । संराधा हे संराधे । या त्वमहं विधरणी इति सर्वस्य प्रपञ्चस्य धारयित्री इति संकल्प्य तिरश्ची निपद्यसे तिर्यक् भूता शेषे पृथिवीरूपेण त्वा त्वां घृतस्य धारया राधयामसि तर्पयामः । अत्र ऋगर्थे न सिद्धे ऋचः परं चतुर्थ्यन्त आदरात् ॥

एकविंशः खण्डः ॥

ad p. 20, r. 20. संपातसेकानन्तरमिदम् ॥

ad p. 20, r. 20. (प्रहस्तं पुंसः) पुंसः प्रजाः कामयमानः प्रहस्तं मणिबन्धनप्रदेशं गृह्णाति ॥

ad p. 21, r. 15—17. हे जानकि त्वं ईरसि ईर्नाम (इट् नाम B) देवता श्रियो ऽधिष्ठात्री इषे त्वेत्यादि प्रसिद्धा सासि । दीर्घरेफौ (°रेभौ MSS) प्रमादपठितावार्षौ वा । ते माता ऊर्क् ऊर्क् नाम देवता प्रजानामन्नानां चाधिष्ठात्री । सा ते माता । यस्मात्त्वमूर्जः

पुत्री ईरू (इरू B) चेति नाम सिद्धं तस्मात्सा तादृशी त्वं प्रजया सह रायस्पोषेण सह मामेहि प्राप्नुहि ॥

ad p. 21, r. 17—18. तस्यां प्रत्यागतायां भ्राता वा अस्या अन्यो वा बन्धुः लाजानभिघारितान् कृत्वा कारयित्वा वा शूर्पादञ्जलिनोपहत्योपहत्यास्या अञ्जलौ द्विर्द्विरावपेत् ॥

ad. p. 21, r. 18—19. तान् लाजान् । इतरा पत्नी । कृत्वा भर्त्रा कारयित्वेत्यर्थः । प्रत्याहुति अग्निं परिक्रम्यपरिक्रम्य तिष्ठन्ती जुहुयात् । कन्यलेत्यादिमन्त्रांस्तु लिङ्गात्पतिरेव वदेत् ॥

ad p. 21, r. 19— p. 22, r. 3. इयं कन्यला कन्या पितृभ्यः पतिलोकं यती पितृगृहात्पतिगृहं प्राप्नुवती दीक्षां सहधर्मचारिणीनियममवयक्षत अवाप्नोति स्मेत्यर्थः । इयं नारी मम भार्या उपब्रूते मन्मुखेन ब्रूते । कथमिति चेत् । दीर्घायुरित्यादि । इयं कन्या मम भार्या अर्यमणं नु देवमिममग्निं भावयित्वा अयक्षत अयजत । स देवो अर्यमा इमां मां च इतःप्रदेशात् प्रमुञ्चतु मद्गृहं प्राप्तुमनुजानातु ॥

ad p. 22, r. 3—4. होमत्रयस्यास्य वक्ष्यमाणधारिकावपनस्य चान्ते चतुःकृत्व इमं मन्त्रं जपेत् ।

ad p. 22, r. 4—5. (तूष्णीं . . . चतुर्थं) चतुर्थमग्नावावपेत् लाजधारिका कामाय वधा इष्टप्राप्त्यर्थम् ॥

ad p. 22, r. 5. (दक्षिणां . . . °चक्षते) अतस्तेनावपेदिति भावः । कामसाधनत्वात्तस्मिन् कामशब्दः ॥

ad p. 22, r. 9—10. सप्तमे पदे एनां निवर्त्य प्राङ्मुखीमवस्थाप्य उदकुम्भगताद्भिरुदकुम्भधरो लाजवापः पतिश्च तां प्रोक्षयेयुः ॥

ad p. 22, r. 10—11. विवाहोत्सवे प्रेक्षकाः ॥

ad p. 22, r. 12—15. प्रागेव तथा प्रतिज्ञाप्य तथा प्रतिज्ञां कुर्वतीं

तां ध्रुवादीन्यदा प्रथममेते दृश्यन्ते तदा प्रेक्षयेत् । तान्दर्शयित्वा पश्येति प्रेरयेत् । सापि ध्रुवं दृष्ट्वा ॥

द्वाविंशः खण्डः ॥

ad p. 22, r. 18—21. स्वं कुलं भर्तृगृहं प्राप्तां तां वधूं सुशीलाः सुप्रजाः समवजीर्णाः जीवत्पतयो नार्यः प्रत्यवरोपयन्ति शिबिकादिभ्यः स्वाङ्के अनेन मन्त्रेणावरोपयन्ति । एना एनेन । अजीत्री अजीर्णा सती । शिष्टं स्पष्टम् ॥

ad p. 22, r. 21— p. 23, r. 1. अथ तां पतिर्नारीणामङ्कात्प्रत्यवरोप्य वृषभस्य चर्मण्यास्तीर्णे अनया ऋचा उपवेशयेत् । पुरस्तात्सान्तकृत्यमेतत् ॥

ad p. 23, r. 1. तस्या अङ्के कुमारं निवेश्य तस्य हस्ते मोदकान् फलानि वा दद्यात् ॥

ad p. 23, r. 4. (...रमस्वेति) ततश्चोत्तरतन्त्रम् ॥

ad p. 23, r. 4—5. अधःसंवेशिनौ अखट्वाशायिनौ । असंवर्तमानौ अपरिष्वजन्तौ ॥

ad p. 23, r. 5—6. (ऊर्ध्वं...संभवः) त्रिरात्रादूर्ध्वं संनिहिते पुण्यदिने संभवः संयोगः स्यात् । चतुर्थस्याह्न अपुण्यत्वे यावत्पुण्यदिनं अपरिष्वजन्तौ सह शयातामिव ॥

ad p. 23, r. 6. (निशायां...°कर्मण्यं) ऊर्ध्वं त्रिरात्रान्निशायां चतुर्थ्यां रात्रावित्यर्थः । जाया च पतिश्च जायापतिकर्मण्यं गृहस्थकर्मार्हं सायंप्रातर्होमादि तदाप्रभृति कार्यमित्यर्थः ॥

ad p. 23, r. 6—16. औपासनाग्नौ पुरस्तात्सान्तकृत्यमेतत् । संवेशनाङ्गो ऽयं होमः प्रत्याहुति संपातं च सिञ्चेत् ॥

ad p. 23, r. 16—17. प्रायश्चित्ताहुत्यनन्तरं चरोरवदायाग्नये स्वाहा

प्रजापतये स्वाहेति ससंपातं हुत्वा । एतासां सप्ताहुतीनां संपातान्पात्रे समानीय भार्याहस्ते दत्त्वा तनाभिनवरन्ध्राणि समालिम्पेति तां ब्रूयात् ॥

ad p. 23, r. 17. (नाभिं प्रथमं) प्रेषिता सा मिश्रितैः संपातैर्नाभिं प्रथममञ्जीत ॥

ad p. 23, r. 17—18. (ततो यान्यूर्ध्वं) तत ऊर्ध्वं यानि चक्षुर्घ्राणकर्णास्यानि तान्यञ्जीत ॥

ad p. 23, r. 18. (ततो यान्यर्वाञ्चि) ततो यान्यर्वाञ्चि नाभियोनिपायवस्तान्यञ्जीत । ततः स्विष्टकृदाद्युत्तरतन्त्रं । आज्ये चरौ च क्रमात् प्रस्तरमूलाञ्जनं भवति ॥

ad p. 23, r. 18—19. (ऊर्ध्वमर्ध° . . . तृचेन) संवेशनं मैथुनं । तृचस्यान्ते संयोगः ॥

ad p. 23, r. 19— p. 24, r. 1. भार्यां प्रत्यभिमन्त्रणं । - - - इयं स्त्री हिरण्मयी अरणी पुत्रारणी एनामश्विनौ देवौ निर्मन्थतां निर्मथितां सूतवै प्रसवाय । शिष्टं स्पष्टम् ॥

ad p. 24, r. 1. (ऋतावृतावेवमेव) एवमेवार्धरात्रादूर्ध्वमेतेन तृचेन कुर्यादित्यर्थः ॥

ad p. 24, r. 1—2. (संवेशने . . . दद्यात्) अग्ने प्रायश्चित्तेत्यादि संवेशनहोमानन्तरमाचार्याय विवाहहोमप्रवेशहोमसंवेशनहोमानामङ्गभूतां दक्षिणां गां दद्यात् ॥

ad p. 24, r. 2. आचार्यस्यादर्शने ऽपरेभ्यो ब्राह्मणेभ्यो दक्षिणां गां दद्यात् । विवाहः समाप्तः ॥

त्रयोविंशः खण्डः ॥

ad p. 24, r. 3. (सायंप्रातर्होमे) विधिं वक्ष्याम इति शेषः ॥

ad p. 24, r. 3—4. (अग्नय ... उत्तरां) सायमिति शेषः । आज्यं पयो व्रीहिर्वा होमद्रव्यम् ॥

ad p. 24, r. 4. (एवं ... सूर्यः) अयं विशेष इत्यर्थः । अस्य चौपासनस्य विच्छेदे ऽपि सायमुपक्रम एवायं भवति ॥

ad p. 24, r. 4—7. सायं प्रातश्च सिद्धस्यान्नस्य बली द्वौ उद्धारौ वर्धयित्वाखण्डञ्च गृहीत्वा तयोः पूर्वस्मात्खण्डादग्नावेताः सप्ताहुतीर्जुहोति औपासनाग्नौ तदभावे पचनाग्नौ ॥

ad p. 24, r. 7. (मनसोत्तरां) उत्तरां प्रजापतय इत्येतां मनसा जुहोति ॥

ad p. 24, r. 7—9. ततो होमार्थमुद्धृतादेवेत्यर्थः । सिद्धमाचारात् गन्धपुष्पमुभयतश्चोदकं बलिहरणेषु । ये देवा हर्षणाः हर्षकराः । वेपनाः भीतिकराः । स्फातिमाहराः भुक्तिमिच्छन्तः । वातस्य भ्राजमन्तरिक्षमनुसंचरन्ति । तेभ्य इत्यादि स्पष्टम् ॥

ad p. 24, r. 9—10. (एवमशनायति) अशनायति अन्नकामे सति पुरुषे एवमेव पूर्ववदेव बलिं भूयो हरेदित्यर्थः ॥

ad p. 24, r. 10. (आयस्थाने ... स्वाहेति) तत्रावशिष्टं सर्वं आयस्थाने लभस्थाने संवत्सराहाराय (°सराभाराय B) लभ्यमानस्य व्रीह्यादेः संग्रहस्थाने मृत्योरधिष्ठानाय स्वाहा इति मन्त्रेण बलिं हरेत् ॥

ad p. 24, r. 10—14. शेषस्य द्वितीयस्य उद्धृतान्नस्य बलिहरणमेतेषु सप्तसु आयतनेषु । ततः प्रदक्षिणमावृतं कुर्यात् । उदधाने इत्यादीनामुदपात्रसमीपे । गृहमध्ये नवसु वास्तुभागेषु उत्तरपूर्वस्मिन्भागे खट्वादेः स्थाने द्वारबाह्यशिलायां द्वारपिधानफलकायां वास्तुमध्ये इति क्रमादर्थः । गृह्याभ्य इत्यादि स्पष्टम् ॥

ad p. 24, r. 14. (शेषं ... निनयेत्) शेषं सर्वं ब्रह्मायतने एव धन्वन्तरये क्षरेत् ॥

ad p. 24, r. 14. (सदा . . . °वाचनं) यथा प्रसन्ना ब्राह्मणाः स्वस्त्यस्त्विति वदन्ति तथा तेषां प्रेरणं स्वस्तिवाचनं । ब्राह्मणान्भोजनादिभिः सत्कुर्यादित्यर्थः । सो ऽयं मनुष्ययज्ञः ॥

ad p. 24, r. 14—15. यद्ब्राह्मणैः सत्कृतैः स्वस्तिवाचनं सा महती सर्वारिष्टानां शान्तिरित्याचक्षते वदन्त्याचार्याः । वैश्वदेवं समाप्तम् ॥

चतुर्विंशः खण्डः ॥

ad p. 24, r. 16. नवविकारेण चरुणा वक्ष्यमाणस्तज्जातीयेनैव पुराणविकारेण चरुणाग्ने ऽग्निधन्वन्तरी प्रजापतिमिन्द्रं च यजेत ॥

ad p. 24, r. 17. (तिस्रश्च नवाहुतीः) तदनन्तरं तिस्रो नवाहुती वक्ष्यमाणा जुहुयात् । एकेनैव तन्त्रेणेति भावः ॥

ad p. 24, r. 17. (नवेन यजेत) वक्ष्यमाणविधिरेव सिद्धावयं विधिर्नियमार्थः । नवेन द्रव्येण यजेतैव नान्यत्र पूर्वं तद्विनियोग इति शरदि संबध्यते ॥

ad p. 24, r. 17. (शरदि व्रीहीणां) ऐन्द्राग्नो वैश्वदेवो द्यावापृथिव्यश्चरव इति प्रतिवाक्यं संबध्यते शरदि व्रीहीणां विकारेण ऐन्द्राग्नश्च वैश्वदेवश्च द्यावापृथिव्यश्च त्रयश्चरवः पृथक् पात्रपक्वाः स्युः ॥

ad p. 24, r. 18—19. (एकचरुर्वा) एकपात्रपक्वचरुर्वा ऐन्द्राग्नो वैश्वदेवो द्यावापृथिव्यश्च स्यात् । तदेवं पुरस्तात्तन्ते पुराणेनैकेनैव चरुणाग्निधन्वन्तरिभ्यां स्वाहा प्रजापतये स्वाहा इन्द्राय स्वाहा इति तिस्रो हुत्वानन्तरं त्रिभिर्वा चरुभिरेकचरुणा वा इन्द्राग्निभ्यां स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा द्यावापृथिवीभ्यां स्वाहा इति तिस्र

आहुतीर्जुहुयात् । अथ स्विष्टकृत् । तत्र प्रतिहविः सकृदवदानं पञ्चावत्तिनः द्विर्द्विरेकैकस्मात् । क्रतुभेदेन तु द्रव्यभेदः ॥

ad p. 24, r. 19. (उक्तो . . . °घारणे) प्राशनाय होम इव उपस्तरणाभिघारणे कुर्यात् ॥

ad p. 24, r. 19. (द्विर्हविषो ऽवद्यति) प्राशनाय नवात् हविषः द्विरवद्यति ॥

ad p. 25, r. 3—5. प्राश्याचम्य परतन्त्रं समापयेत् । विश्वचर्षणीः सर्वप्रजास्वरूपिणी (sic) । वाक्यावृत्तिः समाप्तिज्ञापनार्था ॥

श्रीनिवासाध्वरिकृता टीकेयमतिलघ्व्यपि[१] ।
सुमतीनां भवेन्नित्यं संतोषाय सुबोधिनी ॥

इति जैमिनिसूत्रं पूर्वम् ॥

जैमिनिसूत्रमुत्तरम्[२] ।

प्रथमः खण्डः ॥

ad p. 25, r. 6—8. शुचिवाससः शुक्लवाससः । वास्तु गृहं । सव्यमाचरन्तः अप्रादक्षिण्येन क्रियाः कुर्वन्तः । हविष्यैस्तिलैरुपसिच्य संसृज्य अन्नमुपसाधयेरन् पचेरन् ॥

ad p. 25, r. 9—11. (पाद्यमानीय etc.) सर्वस्मात् (सवस्मात् B, व्यधस्मात् M) तदहरुद्धारात्प्रागुद्धृतं पाद्यं स्नातवद्भ्यस्तेभ्यः समानीय दत्वा तान्ब्राह्मणांस्त्र्यवदातान् त्रिभिर्विद्याजन्मवृत्तैरवदातान् शुद्धान् आ मे गच्छन्त्वित्यादिना उपवेशयेत् ॥

---

१ °लघुपि B, M.

२ Deze aanduiding niet in de HSS.

ad p. 25, r. 11—13. मूलसमीपे छित्वा समाहृतान्दर्भान्प्रसव्यान् अप्रदक्षिणं बद्धान्विष्टरान् कृत्वा मन्त्रैर्ब्राह्मणेभ्यः प्रदद्यात् ॥

ad p. 25, r. 13—14. (हविष्यो° . . . दद्यात्) हविष्यैस्तिलैः सहितमुदकं तिर्यङ् न्यस्तपवित्रं गन्धान्सुमनसश्च तूष्णीं दद्यात् ॥

ad p. 25, r. 14—17. अवत्ता अवदाय । परिस्तरणीयानीति (sic B en M) इतिशब्दः प्रभृतिपर्यायः इध्मपरिधिमेक्षणानां ग्रहणार्थः । तत्सर्वमादायाग्नौ करिष्यामीत्युक्ते कुर्विति तैरनुज्ञातः । प्राग्दक्षिणामुखः आग्नेयाभिमुखः । त्रिर्धून्वन् हस्ततृणानि ॥

ad p. 26, r. 5—6. क्षीरं घृतं वासिञ्चति । वर्धयित्वा प्रभूतं परिवेष्य (परिवेक्ष्य de MSS.) । मया प्रत्तं दत्तं हविः । आमासु पक्वमामपि अपक्वमपि असुपक्वमपि दुस्वादुपक्वमपि तस्मिन्निदमाज्यममृतं निविष्टं तस्मात् हे पितरः यूयं स्वधया मदधमित्यर्थः ॥

ad p. 26, r. 6—17. वर्धितानि एतद्ध इत्यादिभिरादिशति संकल्पयति । . . . (ad अमृता etc. r. 8): हे अग्ने त्वं एकधामापि अद्वितीयस्वरूपो ऽपि त्रिवृता त्रिविधयावृत्त्या पश्यन्ती मध्यमा वैखर्यात्मना वर्तमानो ऽसि । तस्माद् हे वाचो ऽमृतवाचः सरस्वत्याः अमृतपरमार्थस्वरूप तेजोमयी वागिति हि श्रूयते । त्वदनुग्रहेण वाक् ऋङ्मयी अत्र या प्रयुज्यमाना साप्यमृता भवतु । पितॄणां श्रवणीया भवतु । वाचः वाक्यमध्यश्च अमृता भवन्तु । एभिरित्यादि स्पष्टं । हे देवा इहलोके अस्मभ्यं वसीयः सुखमस्तु । (ad r. 10 sq.): अयं यज्ञ इत्यादिपूर्वार्धं स्पष्टं । पितृदैवत्यं पात्रदेयमिदं हविरपि परमं भवत्वित्यर्थः । नो अस्माकं वाङ्क मनश्च पितर इति प्रतिजानीम पितृस्वरूपमित्येव संकल्पयामः । तस्मात्तदुभयं शुद्धं । अश्विभ्यां प्रत्तं अश्विनोर्बाहुभ्यां दत्तं तस्माद्धविरपि शुद्धमिति भावः । (ad r. 12 sq.): य इह पितर

इत्यादि स्पष्टं । ये पितरः वाचं वाचः श्रुत्या रहस्यं वस्त्वात्वा ब्रह्म विदित्वेत्यर्थः (ब्रह्मविदित्येत्यर्थः B) अमृता बभूवुः । शिष्टं स्पष्टं ॥

ad p. 26, r. 18. अनुदिशति निर्दिशति ॥

ad p. 26, r. 19— p. 27, r. 2. मे मया संपादिता भोज्यादयः । यद्यदि । अप्रकामा अरमणीयाः । प्रकामा रमणीया वा । ब्राह्मणे भोक्तरि । समृद्धे श्रोत्रिये । यद्यपि सति । अब्राह्मणे वा अश्रोत्रिये । यद्यपि वा सति । यो वात इयां निर्ऋतिं श्राद्धं रक्षो यथा स्कन्दति निगृह्णाति । नः पितरः येन प्रकारेण प्रीयन्ते तथा तत्सर्वं स वायुः शुन्धतु शुद्धं करोतु । तेनेत्यादि स्पष्टम् ॥

ad p. 27, r. 4—6. यन्मे मया दत्तं मन्त्रकृतं हविः रामा शकुनिः श्वापद इति तिर्यग्योनयः एवमादिरशुचिर्जन्तुः । प्राशत् प्राश्नाति स्म । वैश्वानर इत्यादि स्पष्टम् ॥

द्वितीयः खण्डः ॥

ad p. 27, r. 7—11. शेषमनुज्ञाप्य अन्नशेषैः किं क्रियतामिति प्रश्नेन इष्टैः सह भुज्यतामिति प्रत्यनुज्ञां लब्ध्वा । उल्मुकं संनिहितादेव पितृकार्याग्नेः कंचिदुल्मुकमाकर्मसमाप्ति अनिर्वास्यदग्निकं (sic) निदध्यात् ॥

ad p. 27, r. 13. अपहस्तेन पितृतीर्थेन ॥

ad p. 27, r. 15—17. मात्रादीनामविचारेण (°नां विचारेण B) पित्रादीनविविचयतः इदं पितृभ्य इत्यादयो मन्त्राः ॥

ad p. 27, r. 19 sq. पित्रे नमः पितामहाय नमः प्रपितामहाय नम इति नमस्कृत्य । एतद्व इत्यादिना क्षौमपुच्छं वा वस्त्रपुच्छं वाच्छिद्य वस्त्राण्यतिसृजति ॥

तृतीयः खण्डः ॥

ad p. 28, r. 15—16. मार्गशीर्षमासे या पौर्णमासी सा आग्रहायणी ।

ततः परं ये त्रयो ऽपरपक्षास्तेषामपरपक्षाणां मध्ये एकैकस्मिन्नपरपक्षे एकैकाष्टका कर्तव्या भवति । अष्टम्यां कर्तव्या श्राद्धक्रिया अष्टकेत्युच्यते । ताश्च तिस्रो ऽष्टकाः क्रमात् शाकाष्टका मांसाष्टका अपूपाष्टकेति च अभिधीयन्ते ॥

ad p. 28, r. 16— p. 29, r. 2. तेषां हविषां तैर्हविर्भिः ओदनेन च पृथक्पृथक्पठितैश्चतुर्भिर्मन्त्रैश्चतस्र आहुतीः स्थालीपाकावृता रेवनादिपूर्णपात्रदक्षिणान्तक्रमेण जुहुयात् । अष्टकादयस्तिस्रो देवताः संवत्सरादि पञ्च प्रकारभिन्नः (°न्नं B) कालात्मा भगवान् चतुर्थी देवता । तस्मै भगवते नमोभिर्हविर्भिः कृणुता तृप्तिं कुरुत हे सखायः । कृणुता इति सांहितो दीर्घः । तेषां संवत्सरादीनां पञ्चानां यज्ञियानां यजनीयानां सुमतौ सुमत्या अनुग्रहेण वयं सकुटुम्बाः ज्योक् चिरमजीता अजीर्णाः अहताः अविच्छिन्नायुषश्च स्याम भवेम ॥

ad p. 29, r. 2—3. अष्टभ्य आहुतिभ्यः परमेष्ठि भगेति त्रिरुक्त्वा अग्निमुपस्थाय स्विष्टकृतं हुत्वा प्रस्तरादानाद्युत्तरतन्त्रं समापयेत् । स्विष्टकृदवदानं तु हविर्द्वयात्पृथक्पृथक्सकृत्सकृद्भवति ॥

ad p. 29, r. 4. (तस्या° ... श्रोणीमिति) तस्या गोः सव्यं पार्श्वं सव्यं जघनं सव्यमुरु (l. °मूरुं) च हविरर्थमुद्धरति ॥

ad p. 29, r. 4—5. यस्मिन्दिने अयं होमः ततः परस्मिन्दिवसे अन्वष्टक्यं नाम श्राद्धं कर्तव्यं होमदिवसे वा ॥

ad p. 29, r. 5—7. ब्राह्मणान्हविरर्हान् दत्तदन्तधावनस्नानीयादिकान् स्नातांश्च दत्तपाद्यान् आ मे गच्छन्त्वित्यादिनोपवेश्य तांस्तर्पयित्वा आसनादिशेषानुज्ञापनपर्यन्तं यथाविधि कृत्वा प्रत्येत्य यावत्पिण्डनिधानकर्म । प्राग्दक्षिणायतं चतुरश्रं गोमयेनोपलिप्य तस्मात्पितृहोमाग्नेर्दक्षिणतः षडग्नीनित्युपलक्षणं यावत्पिण्डसंख्यानग्नी-

नित्यर्थः प्रणीय ये रूपाणीत्यादिना प्रागुक्तेन प्रतिष्ठाप्य ये समाना इति प्रदक्षिणपर्यन्तं यथा न नश्येत्तथा कृत्वा तेषामग्नीनामेकैकस्मिन्नग्नावेकैकस्याग्नेरुत्तरपश्चादेकैकां कर्षूमवटमायामेन प्राग्दक्षिणेन प्रादेशमात्रीं पार्थिवेन पृथुत्वेन विस्तरेण त्र्यङ्गुलामवाग्त्वा । त्वाशब्दश्चार्थः । अधस्ताच्च निम्नतयेत्यर्थः । एकाङ्गुलां खानयेन्निखनेत् ॥

ad p. 29, r. 8. (तासु ... °हस्तेन) तासु कर्षूषु अपहता इति पृथक् रेखा लिखित्वा अनुलेखं दर्भानास्तीर्याचमनादि क्रमेण यथाविधि षट् पिण्डान्मिलितेन हविर्द्वयेन निदध्यात् । पिण्डभाजस्त्वत्र मध्याः पितृभ्यः पार्श्वानि स्त्रीणामिति वचनात्पितृमातृपितामहपितामहीप्रपितामहप्रपितामह्य इति गम्यन्ते । जीवतो विना मृतानामेव पिण्डदानमिति ग्राह्यं । अनुनामापहस्तेनेति वधंशकथनस्योपलक्षणत्वात् (वधांश° M. विध्वंश° B) पूर्वखण्डोक्तः सर्वो ऽपि विधिरत्र प्राप्नोति ॥

ad p. 29, r. 8—9. मांसाष्टकायामुद्धृतस्य सव्याङ्गत्रयस्य अन्तरं सारभूतं मध्यांशं पितृभ्यः पितृपितामहप्रपितामहेभ्य उपकर्षति पार्श्वानि बाह्यांशानि स्त्रीभ्यः मातृपितामहीप्रपितामहीभ्यः प्रददातीत्यर्थः ॥

ad p. 29, r. 9—11. तत्रामयावी पिण्डान्प्राश्नीयादित्याद्युक्तपिण्डविनियोगे केचिदध्वर्यवः कर्मतन्त्रकर्तारः पूर्वाचार्याः प्रजाकामस्य पत्नी मध्यमं पिण्डं प्राश्नीयात् । श्राद्धस्य सर्वस्यापि स्थालीपाकं हुतशेषमन्नं वा पत्नी प्राश्नीयादिति ब्राह्मणेष्वधीयते ॥

चतुर्थः खण्डः ॥

ad p. 29, r. 12—13. अथ दहनादिसंस्कारपटलमुपक्रमिष्यमाण आहिताग्निसंस्कारस्य प्रधानत्वात्तमेव प्रथमं विधित्सुः सतिशरीर (sic,

vgl. p. 29, r. 17) इत्यादिना अनष्टशरीरस्य विशेषं विधास्यन्नष्टशरीरस्याहिताग्नेः कर्तव्यं विदधाति । आहिताग्नेः शरीरनाशे पलाशत्सरूणां पलाशपत्त्रनालानां त्रीणि षष्टिशतानि षष्ठ्युत्तरशतत्रयमाहृत्य तैरस्थ्नां प्रतिनिधिभूतैः कृष्णाजिने त्वक्स्थानापन्ने कृष्णाजिने नाडिस्थानापन्नैः कुशैर्बन्धनसाधनैस्तानितान्यङ्गानि बद्ध्वा प्रतिकृतिं कुर्यात् । तत्र प्रत्यङ्गमियत्तापरिच्छेदे (sic) ब्राह्मणमेवोदाहरति अशीत्यर्धमित्यादि विज्ञायत इत्यन्तेन ॥

ad p. 29, r. 13—17. . . . इत्येवंप्रकारेण एतावन्ति एतावत्संख्यानि इहलोके पुरुषस्य मध्ये शरीरं शरीरमध्ये शरीराणि शरीराङ्गभूतान्यस्थीनि भवन्तीति विज्ञायते श्रुतौ दृश्यत इत्यर्थः । अथ आहिताग्नेः क्रमसंस्कार उच्यते. Hierbij sluit zich aan de tekst (met commentaar) v. h. Jaim. brāhm. (vgl. Journ. of the American Oriental Society, XIX, p. 103 sqq.) I. 46; I. 47; I. 48. Na den comm. op Jaim. br. I. 48.5 heet het: इत ऊर्ध्वं संस्तरणीं नाम गां कृत्वा तस्यास्तत्तदङ्गानि परेतस्य तत्तदङ्गेषु विन्यसनादिविधिः कल्पावनुपयुक्तत्वान्न व्याख्यातः; daarop volgt het sūtra (vgl. Jaim. gṛhs. p. 30, r. 3): आस्ये हिरण्यशकलमादाय (sic) उपरि काष्ठानि संस्तीर्य यथास्थितमग्नीन्प्रोक्ष्य उपदीपयन्ति (vgl. Jaim. br. I. 49. 5); dan volgt Jaim. br. I. 49. 6, 1e zin (tot देवलोकः प्रत्यागच्छति) en dan Jaim. gṛhs. p. 30, r. 4 (अथ सामभिरुपतिष्ठते) tot r. 6 (. . . इति ब्राह्मणं). Onderschrift bij dit stuk: इत्याहिताग्निदहनपटलः ॥

ad p. 29, r. 17—18. वक्ष्यति (nl. p. 30, r. 7) आहिताग्नेश्चेत्पूर्वं जाया म्रियेत तां निर्मन्थ्येन दहेदित्यादि तस्यायं पुरस्तादपवादः निरान्त्रकरणानिष्पुरीषकरणाहुतीनां निवृत्त्यर्थश्च । अन्यत्सर्वमाहि-

ताग्निवदेव । सतीशरीरं पतिव्रताशरीरमित्यर्थः । उपरिष्टाद्वक्ष्यमाणनिर्मन्थ्येन दहनं तु अपतिव्रताया इति गम्यते ॥

ad p. 29, r. 18— p. 30, r. 2. (अत्र पात्राणि . . . इत्येतेनानुवाकेन) अत्र सतीशरीरदहने तस्यामित्याद्यनुवाकविहितं यज्ञपात्रनिधानमपि आहिताग्निवदेव कुर्यादित्यर्थः । वचनेनापि सिद्धे सत्यारम्भो ऽयं नियमार्थः । अत्रैव पात्राण्यपचिनोति (sic) नान्यत्रेति । तस्मान्निर्मन्थ्येन दहने पात्राणामग्नीनां च उत्सर्ग एव न तु चितासंयोगः उभयत्रापि भार्याभावात् आहिताग्नेः श्रौतकर्मलोपस्तुल्यः ॥

ad p. 30, r. 2. (य एवंवित् . . . पूर्वमेव) स यदोपतापी स्यादित्यादिना पूर्वोक्तः । जीवत एव श्मशानप्रवेशविधिः पूर्वमेव कृतादियुगेष्वेव नाधुना प्राकृतैस्तथा कर्तुं शक्यमित्यर्थः ॥

ad p. 30, r. 3. (चतुर्गृ° . . . °संभवं) अन्यमाहिताग्नीतरमौपासनाग्निमन्तं समिदाधानाग्निमन्तं वा । आहिताग्निसंस्कारोक्तप्रकारेषु यथा यावता प्रकारेण संभाव्यते तथा संस्कुर्यात् । चतुर्गृहीतं गृहीत्वा । होमस्तु सर्वेषामग्निमतां कार्य इत्यर्थः ॥

ad p. 30, r. 4—6. (सामभिरुप° etc.) सामभिरेतैर्वक्ष्यमाणैरग्निमुपतिष्ठते । नाके सुपर्णमिति ऋचो (ऋच M) ग्राम्ये गेयमरण्ये गेयमिति च द्वे सामनी । तत्र ग्राम्यं सामात्र गेयं भवति । चिताग्निसंयोगेन धूम उदिते सति त्वेषस्ते धूम ऋण्वतीति साम गेयं । अग्नौ समारूढे परेतं स्पृष्टवति अग्ने मृड महं असीति अस्यामृचि द्वे सामनी । तयोरन्यतरेणोपतिष्ठते । असौ लोकः पराग्वै भवति असंनिहितो वै भवति । तस्मात्पराग्भिरेतैः सामभिरुपतिष्ठेत अनावृत्तैरित्यर्थः । इति हि ब्राह्मणं इति प्ररोचनार्थः ॥

पञ्चमः खण्डः ॥

ad p. 30, r. 6—7. निर्मन्थ्येनापूर्वारणिमन्थनजनितेन । सांतपनेन श्रौताग्निसंतप्तकपालोद्धृतेनाग्निना वा तां दहेत् । अत्र वक्तव्यसतीशरीरमित्यादि सूत्रव्याख्यानावसर एव उक्तम् ॥

ad p. 30, r. 7—9. श्मशानकृतं श्मशानार्थस्थलं । अनिरिणं ऊषरवर्जितं । अपसलवक्रोदकं अपसव्यावृत्तोदकं च । स्वकृतं स्वत एव तथाविधं । तदलाभे यत्नतस्तथा कृत्वा वा यत्र वा ओषधयो जायन्ते तस्मिन्स्थले वा शरीरं निःशेषं दग्ध्वा दग्धमनवेक्षमाणा उदककरणाय यान्ति ॥

ad p. 30, r. 9—10. (न वाहिनीषु कुर्वन्ति) वाहिनीषु नदीषु प्रवाहजलेष्वित्यर्थः उदकदानं न कुर्यात् किंतु स्थावरजलेषु वाप्यादिष्वेव कुर्यादित्यर्थः ॥

ad p. 30, r. 10. (तेषां योयः . . . ऽग्रं) तेषामुदकदायिनां मध्ये योयः पश्चाज्जातः वयसन्यूनः स्यात्सो ऽग्रमुदकदानमाचरेत् । तदनन्तरं वयोज्येष्ठ इत्यर्थः ॥

ad p. 30, r. 10—11. (कुर्यादुपकूलं) जलमध्ये उदकदानं न कुर्यात् किंतु उपकूलं कूलसमीपे कुर्यात् । यथा कूले क्षिप्यमाणं जलं पुनर्वाप्यादौ संनिपतेत् तथा कुर्यादिति गम्यते ॥

ad p. 30, r. 11. (अकूले . . . खात्वा) वाप्यादिजलस्य कूलादतिविप्रकृष्टत्वादिनिमित्तेन जलाशयकूले उदकदानं कर्तुं अलाभे सति क्वचित्कूपं खात्वा घटाद्याहृतजलेन तस्मिन्कूपे कुर्यात् ॥

ad p. 30, r. 11—12. एतत्त उदकं गोविन्दशर्मन्नित्येवमादिप्रकारेणेत्यर्थः ॥

ad p. 30, r. 12. (वाहिनीषु . . . केशान्) स्थावरजलालाभेन

प्रवाहजलेष्वेवोदकदाने केशानुच्चैर्बद्ध्वा उदकं दद्यादित्यर्थः । अन्यत्र मुक्तकेशेनैव उदकदानमिति गम्यते ॥

ad p. 30, r. 12—14. (निमज्य etc.) उक्तप्रकारेण निमज्य एकाञ्जलिं दत्वा लम्बमानान् केशान् करनिष्पीडितजलानुपनिबध्य जलाशयतीरं (रा MS.) नीतस्य दीप्ताङ्गारकस्य उल्मुकस्याग्निमनेन मन्त्रेण स्पृशेत् । शूकाह्निर्नाम कश्चिदग्निः । अपहतेति व्यत्ययात् बहुवचनं अपजहीत्यर्थः ॥

ad p. 30, r. 16—17. कल्याणीभिर्दीर्घायुषो भवन्त इत्यादिभिः शोकापनोदिनीभिर्वाग्भिरित्यर्थः ॥

ad p. 30, r. 17. माषो नाम प्रमाणविशेषः । माषप्रमाणपरिमितस्वर्णं विक्रीतद्रव्येण सर्वे क्षुद्रावृत्तिं कुर्वन्ति । अल्पमश्नन्तीत्यर्थः ॥

ad p. 30, r. 18. (शाल्या वा) किंचिदप्यभक्षित्वा वेत्यर्थः । इत्युदकदानविधिः । अथ संचयनविधिः ॥

ad p. 30, r. 18—19. क्षीरोदके समे संसृज्य शरीराण्यस्थीनि मृण्मयेन कोशेन औचित्यात् गोशृङ्गाकारनिर्मितेनेत्यर्थः ॥

ad p. 30, r. 20. (असंह्लादयन्) असंह्लादयन् कटकटाशब्दमकारयन् ॥

ad p. 31, r. 1. तदाहृत्य गच्छन् कंचन चतुष्पथं महावृक्षं नदीं वा अतीत्य गत्वा तीर्थेषु पुण्येषु निखनेत् ॥

ad p. 31, r. 2. प्रेतस्य तृतीये ऽह्नि संचयनानन्तरं संस्कर्तारं श्रोत्रिया अपामार्गपिष्टेन मृदा गोमयेन च स्वकरदत्तेन स्नापयन्ति ॥

ad p. 31, r. 2—3. (वासांसि . . . आसते) सर्वे ऽप्यघिन इति शेषः ॥

ad p. 31, r. 3. (चतुर्थी . . . °वर्तयेरन्) चतुर्थदिवसमारभ्य अघिनः

सर्वे भिक्षाशनेन जीवेयुः तस्यां भिक्षायां श्रोत्रियगृहे नीतायां वैश्वदेवादिः सिद्धवाव्यन्नशेषासिततया पूता क्षघिनो भवन्तीति भावः ॥

ad p. 31, r. 4. (कालं च . . . संतरेयुः) यावत्कालं च ये (वयं MS) अग्नौकरणादिकारिणो भवेयुस्तावत्कालं भिक्षाशिनश्च स्युरित्यर्थः ॥

ad p. 31, r. 4—5. (ऊर्ध्व etc.) एकोद्दिष्टश्राद्धप्रदानपर्यन्तं दशाहमध्ये विहितादन्यत् न किंचित्कस्मैचिद्दद्युः ॥

ad p. 31, r. 5. (नक्षत्रेषु नियमः) एकोद्दिष्टश्राद्धस्य नक्षत्रनियम उच्यते ॥

ad p. 31, r. 5—6. (मघासु . . . °समयेषु) एकतारेषु आर्द्राचित्रास्वातीषु पूर्वसमयेषु पूर्वफल्गुनीपूर्वाषाढापूर्वप्रोष्ठपदासु ॥

ad p. 31, r. 6. (न रोहिण्यामुत्तरेषु ध्रुवेषु) उत्तरेषु उत्तरफल्गुण्युत्तराषाढोत्तरप्रोष्ठपदासु एतान्येव प्रतिषिद्धानि नक्षत्राणि ध्रुवाणीत्यभिधीयन्ते। विहिताभि (sic) प्रतिषिद्धेतरेषु नक्षत्रेष्वपि कुर्यादिति भावः ॥

ad. p. 31, r. 6—9. सामान्यश्राद्धापेक्षया एकोद्दिष्टश्राद्धे विशेषविधिरुच्यते । एकवत् यथाश्राद्धं पिण्डप्रदानं च क्रियमाणं मृतमेकं प्राप्नोति । तथा मन्त्रवाक्येषु पितामहादिनिर्देशवर्जं पदविन्यासः कर्तव्यः । ये च वात्रान्वित्यादि च न ब्रूयात् । मृतस्य एकस्यैवार्थे त्र्यवरा ब्राह्मणा भोजनीयाः । ते च वस्त्रादि (l. वस्त्रादिभिः) सर्वकामैश्च तर्पणीयाः । पिण्डदानानन्तरं च गच्छन्तो ऽनुमन्त्रणं शेषस्याप्राशनं (sic) स्वस्तिवाचनानन्तरं भोजनं चेति ॥

षष्ठः खण्डः ॥

ad p. 31, r. 10—11. गृहकर्मणः गृहस्थाश्रमधर्मस्य सिद्धार्थं गृहवृद्धिं गृहस्य धनधान्यैर्द्विपद्भिश्चतुष्पद्भिश्च समृद्धिमिच्छन्नुक्तकाले गृहशान्त्याख्यं कर्म आरभेत ॥

ad p. 31, r. 11—15. अपामार्गादयो ऽष्टौ । सहाभद्रा शिशुपूला । अमृताः पूर्वा (l: दूर्वाः)। तृणं कुशाः । परिसमूह्य संमृष्टधूल्यादिकं क्वचित्समूहीकृत्य । सिद्धार्थकान् सर्षपान् । वास्तुबलिं कृत्वा गृह-मध्ये प्रदेशमीश्च(व)ह्लीगन्धपुष्पादिभिरलंकृत्येत्यर्थः । अलंकृतवा-स्तुस्थले पुरस्तात्स्थाले वास्तोष्पतये स्वाहेत्याज्येन हुत्वा सावित्र्या सहस्रं चाज्येन जुहुयात् ॥

ad p. 31, r. 15—16. उक्तप्रकारेण चतसृषु विदिक्षु होतव्यं वा-स्तुमध्ये मात्रं वेत्यर्थः ॥

ad p. 31, r. 16. (गौर्वा°...दक्षिणा) अयमिदं समुदितं दक्षिणा-त्वेन देयं न तु विकल्पः ॥

ad p. 31, r. 16—17. परिविष्य तर्पयित्वा । पुण्याहं भवन्तो ब्रुव-न्त्वित्यादि तैः पुण्याहं वाचयित्वा समापयेत् ॥

ad p. 32, r. 1—3. अश्वादिकं वा उपतप्येत सर्वेषां द्विपदां चतु-ष्पदामन्यतरद्वा उपतप्येत तदाप्येवं जुहुयादित्यर्थः ॥

अष्टमः खण्डः ॥[1]

ad p. 32, r. 12. अथातः अनश्नता प्रयोक्तव्या संहिता अनश्नत्सं-हिता तत्प्रयोगं तत्प्रयोगविधिं व्याख्यास्याम इत्यर्थः ॥

ad p. 32, r. 12—13. अनश्नत्संहितायाः प्रयोक्ता शुक्लवासाश्चीरवा-सा वा स्यात् ॥

ad p. 32, r. 13—14. ब्राह्मण एव अनश्नत्संहितां प्रयुञ्ज्यान्न तु क्षत्रियवैश्यौ ॥

ad p. 32, r. 21— p. 33, r. 1. सामसावित्रीं तत्सवितुर्वरेण्यमिति

---

[1] De Comm. op den 7[en] kh. ontbr.

साम। सोमं राजानमिति साम। ब्रह्म जज्ञानमित्यृचि सामद्वयं च मनसाधीत्य वेदादिमारभेत ॥

ad p. 33, r. 1. (संतत° . . . मौनी) संततमविच्छिन्नधारं यथा भवति तथा मौनी व्यवहारान्तररहितः ॥

ad p. 33, r. 1. (न चान्तरा विरमेत्) संहितासमाप्तिपर्यन्तं मध्ये विरतो न भवेत् ॥

ad p. 33, r. 1—3. (अथान्तरा . . . आरभेत) अथ मध्ये व्यवहरेत् विरतो वा भवेच्चेत् आतम्य यावद्वानि (l. यावद्वानं) निरुद्धप्राणो भूत्वा वृत्तान्तात्प्रागधीताच्छेशमारभेत ॥

ad p. 33, r. 3—4. अप्रतिभायां मध्ये कतिपयवेदांशस्य स्फुरणे यावता कालेन अस्फुरितांशं वेदमधीयीत तावत्कालं ऋग्वेदाद्यजुर्वेदात्सामवेदाद्वा यज्ञानीयात् यावतीर्ऋचः यावन्ति यजूंषि यावन्ति वा सामानि जानीयात्तान्यधीयीत[1]। एवं चेत् अस्फुरितांशाध्ययनफलमाप्नुयादित्यर्थः ॥

ad p. 33, r. 4—5. अस्फुरितांशवेदतुल्यच्छन्दोदैवतब्राह्मणं साम वा तावत्कालमधीत्य तत्फलमाप्नुयात् ॥

ad p. 33, r. 5. (अक्रानि° . . . °भ्यसेत्) अक्रानित्यृचि यत्साम तदेकमेव वा अस्फुरितवेदांशाध्ययनतुल्यकालमावर्त्य अस्फुरितवेदांशाध्ययनफलमाप्नुयात् ॥

ad p. 33, r. 5—6. अस्य संहितां प्रयुञ्जानस्य सर्वाभीष्टसमृद्धिर्भवत्येव (सर्वाह्वीष्टसमृद्धिर्भवतेव Ms.) ॥

ad p. 33, r. 6—7. (आद्यं . . . जैमिनिः) आद्यं त्रिवर्गं अग्र आद्या-

[1] Hier breekt M² af.

ह्रीत्यृचि यत्सामत्रयं तदेव वा सहस्रकृत्व आवर्त्य संहिताप्रयोगफलं लभतेति जैमिनेर्मतमिति । आचार्यग्रहणं पूजार्थं ॥

ad p. 33, r. 7. (च वार्यमन्तं वा) यन्नियासि च वार्यमित्यन्तं यानि सामानि तानि मात्रमधीत्य वा संहिताध्ययनफलमाप्नुयात् ॥

ad p. 33, r. 7. (यथाकामी वा) स्वेच्छया यत्र क्वचित् यानि कानि च सामानि यथाशक्ति वाधीत्य संहिताध्ययनफलमश्नुयादित्यर्थः ॥

ad p. 33, r. 7—9. (द्वादश संहिता . . . ब्रह्म भवति) अनश्नत्संहिता द्वादशधावर्त्य यदनेनाधयित्रा (l. °ध्येत्रा ?) अनध्यायेषु अष्टम्यादिषु अधीतं गुरवो वा अशुश्रूषया कोपिता वेति यत् यानि वा अकार्याणि विहितभिक्षाशनादि व्रतानुष्ठानप्रतिषिद्धपर्युषितभोजनादीनि कृतानि ताभिर्दुश्चर्याभिः पवते अपवित्रतां न प्राप्नोति । अस्य ब्रह्म अधीतो वेदश्च शुद्धस्तेजस्वी भवति ॥

ad p. 33, r. 9—10. द्वादशसंहितावृत्त्यनन्तरं पुनर्द्वादशधावर्त्य शुक्रस्य लोकं प्राप्नोति ॥

ad p. 33, r. 12—13. (चक्षुर्लभते) चक्षुरतीन्द्रियज्ञानमित्यर्थः ॥

ad p. 33, r. 13—14. यावकः यवविकारः । उदकमिलिताः सक्तवः उदकसक्तवः । सक्तवो लाजचूर्णाः । एवं संहितां प्रयुञ्जानः क्षिप्रमन्तर्धानशक्तिं लभते ॥

ad p. 33, r. 14—15. (ज्ञातीन्पुनाति) बन्धून्निष्पापान् करोति ॥

ad p. 33, r. 15. तारयते कर्मबन्धादुद्धरति ॥

ad p. 33, r. 15—16. (तामेतां . . . आचक्षते) तामेतामनश्नत्संहितां देवलोकमारोढुं सोपानपरं परेत्याचक्षते पूर्वाचार्याः ॥

ad p. 33, r. 16. एतया वा अनश्नत्संहितया बहुधावृत्तया देवत्वं देवा ऋषित्वमृषयश्च प्राप्तवन्तः ॥

ad p. 33, r. 16—19. अस्य अनश्नत्संहिताध्ययनस्य प्रातर्मध्याह्ने ब्राह्मे मुहूर्ते वा आरम्भकालः न तु पुण्यदिनान्वेषणम् ॥

ad p. 33, r. 19—20. (तद्वा एतत् etc.) एतदनश्नत्संहिताध्ययनविधानं । ब्राह्मणेभ्य इति द्विरावृत्तिः प्रश्नसमाप्तिद्योतिका । इत्यनश्नत्संहितापटलः ॥[1]

यस्यात्मा कमलाक्षपादजलजे भृङ्गायते सर्वदा यद्बुद्धिर्निगमार्थ-
बोधसरणौ नाभ्येति वक्राध्वनि ।
विश्वामित्रकुलाब्धिपार्विकशशि[2] स श्रीनिवासाध्वरी चक्रे जैमि-
निगृह्यकर्मविवृतिं बालात्मबोधक्षमाम् ॥

इति जैमिनिसूत्रव्याख्यानं संपूर्णम् ॥

---

१ Tekst en comm. van khaṇḍa 9 zijn niet in de Subodhinī voorhanden.

२ ° l. शशी

# LIJST DER MANTRA'S.

---

De parallelen zijn slechts volledig uit het Mantrabrāhmaṇa aangegeven; tot de mantra's, die ik uit geen gedrukten tekst heb kunnen aanwijzen, gaf ik, voor zoover mogelijk, de parallelen uit andere, nog niet gepubliceerde teksten. Het vette cijfer duidt de pagina van den tekst, het gewone den regel aan. Het voor een mantra geplaatste cijfer

1, duidt aan, dat het mantra in 't Jaim. gṛhs. in pratīka geciteerd wordt en in de saṃhitā der Jaiminīya's gevonden wordt;

2, dat het mantra in 't Jaim. gṛhs. sakalapāṭhena geciteerd wordt en toch in de Jaiminīyasaṃhitā aanwezig is;

3, dat het mantra sakalapāṭhena in het door mij ontdekte Agniṣṭomasūtra der Jaiminīya's gevonden wordt;

4, dat het mantra uit geen anderen tekst hetzij geheel zóó als in 't Jaim. gṛhs. hetzij over 't geheel is na te wijzen;

5, dat het mantra volkomen met het Mantrabrāhmaṇa overeenstemt en slechts hieruit bekend is.

Meer parallelen dan de door mij aangegevene, kan men gemakkelijk uit het voortreffelijk Spruchverzeichniss bij het Mānavagṛhya (ed. Knauer) en uit den Mantrapāṭha vinden.

De Sāmaveda (Jaiminīyarecensie) is geciteerd als JS, volgens de uitgave die ik bezig ben voor te bereiden.

Het Mantrabrāhmaṇa (MBr.) is geciteerd volgens de uitg. van Satyavrata in de »Uṣā".

Het Gobhilagṛhya (Gobh.) volgens Knauers uitg.

De Mantrapāṭha volgens de uitgave van Winternitz.

Waar een enkele auteursnaam gegeven is, wordt steeds naar het betrekkelijk Gṛhyasūtra verwezen.

1 अक्रान्समुद्रः **27**, 2; **33**, 5: JS. I. 3. 6. 5; III. 49. 1.
अग्नय इन्द्राग्निभ्याम् **4**, 3.
अग्नये कव्यवाहनाय स्वधा **26**, 1: MBr. II. 3. 2 (var.).
अग्नये ऽग्नीषोमाभ्याम् **4**, 3.
अग्नये त्वा परिददामि **11**, 17.
अग्नये ऽनुमतये स्वाहा **4**, 13.
अग्नये समिधमहार्षम् **11**, 21: MBr. I. 6. 32 (var.).
अग्नये सोमाय प्रजापतये **6**, 13.
अग्नये सोमाय रुद्राय **32**, 16.
अग्नये स्वाहा **4**, 1.
अग्नये स्वाहा सोमाय स्वाहा **24**, 5.
अग्निः प्रथमः प्राश्नातु **25**, 3: MBr. II. 1. 15 (var.).
अग्निरेतु प्रथमः **19**, 15: MBr. I. 7. 10 (var.).
1 अग्ने त्वं नो अन्तमः **13**, 20: JS. I. 2. 4. 9. 2; III. 34. 15.
अग्ने प्रायश्चित्ते **23**, 6: MBr. I. 4. 1 (var.).
1 अग्ने मृड **30**, 5: JS. I. 1. 3. 3.
अग्ने वायो सूर्य **23**, 14: MBr. I. 4. 5 (var.).
अग्ने व्रतपते **13**, 4, 9: MBr. I. 6. 9 (varr.).
4 अग्ने शृकाहि **30**, 13.
अघोरचक्षुः **21**, 7: MBr. I. 2. 17 (var.).
अङ्गादङ्गात् **7**, 10: MBr. I. 5. 16 (varr.).
अत्र पितरः **27**, 17: MBr. II. 3. 6.
अदिते ऽनुमन्यस्व **3**, 14 (**5**, 18): Gobh. I. 3. 1.
1 अधायामृत (?) **32**, 8: JS?

4 अधिगन्तरधिगच्छ **11**, 4.

अनुमते ऽनुमन्यस्व **3**, 14 (**5**, 18): Gobh. I. 3. 2.

अनृक्षरा ऋजवः **19**, 12.

4 अन्तरिक्षे ऽङ्क्ष्व **4**, 12.

अन्नपते ऽन्नस्य **8**, 14.

अन्वद्य नः **20**, 12: MBr. II. 2. 19 (varr.), vgl. AV. VII. 20 1; Maitr. S. III, p. 189, r. 10; Kauś. sū. 45. 16.

अपहतो मे पाप्मा **17**, 11.

अपहता असुराः **27**, 7: MBr. II. 3. 3 (varr.).

4 अपां ऽभिर्वान्ति **16**, 2: vgl. Khād. II. 5. 31.

अप्रजस्ताम् **20**, 16: MBr. I. 1. 14 (var.).

अप्सरासु या मेधा **12**, 4: Taitt. ār. X. 41; Mantrap. II. 4. 6; Hir. I. 8. 4.

अभिरमन्तां भवन्तः **27**, 3.

अभ्यङ्क्ष्वासौ **28**, 1.

अमीमदन्त पितरः **27**, 18: MBr. II. 3. 7.

अमुष्मै स्वधा **26**, 18.

4 अमृता वाक् **26**, 8: vgl. Kāṭh. (altind. ahnenk. p. 255).

अमो ऽहमस्मि **21**, 12: vgl. Mantrap. I. 3. 14; afwijkend in Jaim. up. brāhm. I. 54. 6.

4 अयं यज्ञः **26**, 10: vgl. Kāṭh. (altind. ahnenk. p. 256).

अयं त इध्म आत्मा **3**, 18: Āśv. I. 10. 12; Bhār. I. 4; Hir. I. 2. 11.

अरुन्धत्यरुद्धा **22**, 14: vgl. Gobh. II. 3. 11.

4 अर्कवानन्नादः **18**, 1.

अर्यम्णां नु **22**, 2: MBr. I. 2. 3 (var.).

अश्मा भव **7**, 17: MBr. I. 5. 18. a en 19.

4 अश्मासि **30**, 14.

अष्टकायै सुराधसे स्वाहा **28**, 18.

अष्टकायै स्वाहा **28**, 17.

अङ्गे त्वा परिददामि **7**, 12: MBr. I. 5. 15 (var.).

आकूत्यै स्वाहा **4**, 17.

आङ्क्ष्वासौ **28**, 1.

आचाम पितः **27**, 11.

4 आदर्शोऽसि **16**, 19.

आदित्य व्रतपते **13**, 6: MBr. I. 6. 11 (varr.).

आ नः प्रजाम् **21**, 9: MBr. I. 2. 18 (var.).

आप उन्दन्तु **9**, 6: MBr. I. 6. 3 (Jaim. langer).

आप ओषधयः **5**, 11.

1 आपोहिष्ठीयास्तिस्रः **13**, 16; **22**, 10: (schijnen niet in de Jaim. Saṃh. gevonden te worden).

4 आमासु पक्वम् **26**, 5—6: vgl. Kāṭh. (altind. ahnenk. p. 256).

4 आ मे गच्छन्तु पितरः **25**, 9: vgl. Kāṭh. (l. c. p. 255).

आयमगात्सविता **9**, 2—4: MBr. I. 6. 1 (Jaim. veel langer).

आयुषे त्वा **4**, 13.

आलिखन्विलिखन् **8**, 10: vgl. Pārask. I. 16. 23.

4 इदमन्नमयं रसः **7**, 8.

इदं पितृभ्यः **27**, 15.

इदं भूमेर्भजामहे **2**, 2: MBr. II. 4. 1 (vgl. Jaim. gṛhs. p. 2, r. 3).

इन्द्रस्ते हस्तम् **11**, 10: Hir. I. 5. 19; MBr. I. 6. 15 (varr.).

इन्द्राय स्वाहा **3**, 21.

इमंस्तोम्यं तृचम् **2**, 3: JS. III. 32. 4—6.

इममश्मानम् **10**, 17: MBr. I. 2. 1 (var.).

इमामग्निस्त्रायताम् **19**, 17: MBr. I. 1. 11 (var.).

इयं दुरुक्तात् **12**, 6: MBr. I. 6. 27 (lichte var.).

इयं नारी **21**, 20: MBr. I. 2. 2 (langer).

इह गावः **22**, 21 = Bhāradv.; MBr. I. 3. 13 (var.).

इह धृतिः **23**, 2: MBr. I. 3. 14.

इह प्रियम् **22**, 19: Mantrap. I. 9. 4.

4 ईर्वमसि (!) **21**, 16.

1 उदुत्तमम् **17**, 8: JS. II. 5. 1.

2 उदु त्यम् **4**, 19: JS. I. 1. 3. 11; IV. 1. 10.

उद्वयं तमसस्परि **4**, 21; **13**, 21.

उष्णेन वायो **9**, 4—6: MBr. I. 6. 2 (var.).

ऊर्जं वहन्तीः **28**, 5: MBr. II. 3. 15.

1 ऋचं साम **14**, 9: JS. I. 2. 3. 6. 10.

ऋचा स्तोमम् **4**, 18.

ऋतस्य गोप्त्री **12**, 8: MBr. I. 6. 28 (var.).

एकमिषे **22**, 6: MBr. I. 2, 9—12 (varr.).

एकाष्टकायै स्वाहा **28**, 18.

4 एतत्ते पितरसौ **25**, 12.

एतत्ते पितरसौ **27**, 13.

एतद्वः पितरः **26**, 7: vgl. Kaṭh. (altind. ahnenk. p. 256).

एतद्वः पितरः **27**, 20: MBr. II, 3, 14, 12, 16 (de laatste met var.).

एतमु त्यम् **25**, 1: MBr. II. 1. 16 (lichte var.).

4 एषा व ऊर्क् **26**, 14: vgl. Kāṭh. (altind. ahnenk. p. 256).

एहि भग **29**, 3.

ओं तपश्च तेजश्च **2**, 17: MBr. II. 4, 5 en 6 (verscheidene varr.).

ओषधयो वनस्पतयः **5**, 11.

कन्यला **21**, 19: MBr. I. 2. 5 (lichte var.).

कामाय स्वाहा **4**, 17: vgl. Mān. II. 13. 6.

को नामासि **11**, 7: MBr. I. 6. 17.

को ऽसि कतमो ऽसि **7**, 16: MBr. I. 5. 14. a

4 गन्धर्वो ऽसि **18**, 1.

गर्भं धेहि **23**, 20: MBr. I. 4. 7.

गृहाः पशवः **5**, 10.

गृह्णामि ते **21**, 1: MBr. I. 2. 16 (lichte var.).

गृह्याभ्यो देवताभ्यः **24**, 11: Mān. II. 12. 6; Kauś. sū. 74. 10.

3 गौर्धेनुर्हव्या **19**, 3—7.

चन्द्र प्रायश्चित्ते **23**, 12: MBr. I. 4. 3 (var.).

2 चित्रं देवानाम् **4**, 20: JS. II. 4. 6.

जीवा स्थ **12**, 19—20: vgl. Śāṅkh. II. 6. 1.

4 ज्योतिरभिवीक्षे **16**, 3: vgl. Khad. II. 5. 31.

1 तरत्स मन्दी (चतस्रः) **13**, 16: JS. III. 31. 27.

तां पूषन् **21**, 11.

त्रियायुषम् **10**, 1 = Mantrap. II. 7. 2; MBr. I. 6. 8 (varr.). Jaim. up. brāhm. IV. 3. 1 (eerste helft).

1 त्वं वरुण **13**, 20: JS. III. 54. 6.

1 त्वेषस्ते धूमः **30**, 5: JS. I. 1. 9. 3.

1 दधिक्राव्णः **14**, 13: JS. I. 2. 3. 5. 7.

4 दिव्यङ्ङ **4**, 11.

देव सवितः प्रसुव **3**, 15—17 (**5**, 18): MBr. I. 1. 1.

देवस्त्वा सविता **2**, 13: Gobh. I. 7. 25.

देवस्य त्वा सवितुः **1**, 7; **18**, 19.

देवा ऋत्विजः **5**, 8.

4 देवाश्च पितरश्च **28**, 9.

देहि भिक्षां भवति **12**, 18: Kauś. sū. 57. 18.

द्यौस्ते पृष्ठम् **20**, 13: MBr. I. 1. 12; Hir. I. 19. 7.

5 द्विषन्तं मे ऽभिधेहि **4**, 14: MBr. II. 8. 13. b.

द्विषतां वधो ऽसि **17**, 7.

1 धानावन्तम् **14**, 13: JS. I. 2. 1. 10. 7.

धारयतु प्रजापतिः **9**, 8: Man. I. 21. 3.

ध्रुवो ऽसि **22**, 12—13: vgl. Gobh. II. 3. 9.

नमो वः पितरः **28**, 2: MBr. II. 3. 8—11 (varr).

नमो वाताय **11**, 2.

1 नाके सुपर्णम् **30**, 4: JS. I. 2. 3. 1. 3.

नान्दीमुखाः पितरः **6**, 18.

नेत्रे स्थः **18**, 3: MBr. I. 11. 12 (var.).

परीममिन्द्र<br>
परीमं पोष } **10**, 8—14; **17**, 19: Hir. I. 4. 8; Kaṭh. 41; AV. XIX. 2. 42.<br>
परीमं सोम

पवित्रे स्थः **2**, 8: Gobh. I. 7. 22.

4 पशुमभिवीक्षे **16**, 3: vgl. Khād. II. 5. 31.

पितरेतत्ते **27**, 15.

1 पुरुषसूक्तम् **6**, 4: JS. II. 3. 6—4. 2.

पूषा त्वेतः **22**, 16.

4 पृथिव्यामङ्ग **4**, 21.

प्रजापतये स्वाहा **3**, 21.

4 प्रजापतिः पुरुषः **6**, 5.

प्रजापते न त्वत् **5**, 2; **6**, 22; **20**, 19; **32**, 10: MBr. II. 5. 9.

प्रजां पशून् **7**, 5.

1 प्रत्यग्ने **32**, 9: JS. I. 1. 10. 6.

4 प्रदातः प्रयच्छ **11**, 4.

1 प्र मित्राय **14**, 1: JS. I. 2. 2. 3. 3.

5 प्र मे पतियानः **20**, 4: MBr. I. 1. 8. a.

प्राणानां ग्रन्थिरसि **11**, 13: MBr. I. 6. 20 (sterk afw.).

प्राणाय त्वापानाय **7**, 2.

5 प्रास्याः (पतियानः etc.) **20**, 5: MBr. I. 1. 9. a.

ब्रह्मचर्यमगाम् **11**, 7: MBr. I. 6. 16.

ब्रह्मचार्यसि **11**, 20: MBr. I. 6. 25 (var.), 26 (var.).

ब्रह्मचार्याचार्याधीनः **13**, 10.

1 ब्रह्मजज्ञानीये (उभे) **32**, 21: bij JS. I. 2. 3. 1. 9.

ब्रह्मवर्चसी भूयासम् **17**, 21.

भद्रान्नः श्रेयः **24**, 19: MBr. II. 1. 13 (lichte varr.)

भवति भिक्षां देहि **12**, 16: Kauś. sū. 57. 16.

भिक्षां भवति देहि **12**, 17: Kauś. sū. 57. 17.

भूर्भुवः स्वाहा **10**, 20— **11**, 1.

भूः स्वाहा भुवः स्वाहा **4**, 1; **5**, 4; **12**, 5.

मनः समाधीयताम् **6**, 17.

मयि पश्या विराट् **18**, 15.

मयि व्रते **11**, 14—17: MBr. I. 2 21 (varr.).

1,3 मयि वर्चः **18**, 16: JS. II. 1. 4.

मयि श्रीः श्रयताम् **18**, 15: Āśv. I. 24. 29; Mān. I. 9. 16.

1 महानाम्नी **15**, 11: JS. II. 7.

महाव्याहृति **6**, 22; **8**, 19; **10**, 19; **20**, 7; **32**, 10.

महां त्वा यशसे **18**, 20.

मा ते गृहे **20**, 10: MBr. I. 1. 13 (varr.).

4 मा मे क्षेष्ट **28**, 7: vgl. Kāṭh. (altind. ahnenk. p. 258).

मासाः पितरः **5**, 9.

4 मृत्योरधिष्ठानाय स्वाहा **24**, 10.

1 मेधाकारम् **14**, 10: JS. III. 28. 6.

4 य इह पितरः **26**, 12: vgl. Kāṭh. (altind. ahnenk. p. 255—256).

1 यं रक्षन्ति **32**, 9: JS. I. 2. 1. 8. 1.

1 यज्ञः संवत्सरः **5**, 12.

1 यत इन्द्र **32**, 8: JS. I. 2. 2. 5. 2; III. 55. 12.

यत्क्षुरेण **9**, 16—18: Mān. I. 21. 7; Āśv. I. 17. 16; Pār. II. 1. 19.
Mantrap. II. 1. 7; Hir. 1. 9. 16.

यदस्य ते सरस्वति **5**, 15—17: TBr. II. 5. 8. 6.

1 यद्ध उ विश्पतिः **32**, 9: JS. I. 1. 12. 8.

4 यन्मे प्रकामः **26**, 18 sqq.: vgl. Kāṭh. (altind. ahnenk. p. 256—257).

4 यन्मे रामः **27**, 4: vgl. Kāṭh. (altind. ahnenk. p. 258).

यमायाङ्गिरस्वते **26**, 3.

1 यशसा मे **17**, 19: JS. II. 2. 2.

या अकृन्तन् **20**, 2: MBr. I. 1. 5 (varr.).

या तिरश्ची **20**, 7—9: MBr. I. 5. 6 (varr.).

यानि कानि च पापानि **20**, 17: MBr. I. 3. 6 (var.).

येन तत्प्रजापतिः **9**, 11.

येन धाता **9**, 9—11: Āśv. I. 17. 12; MBr. I. 6. 7 (vele varr.).

येन भूयश्चरात्ययम् **9**, 13: Āsv. I. 17. 13 (tekst der Bibl. Ind.).

ये रूपाणि **27**, 9: MBr. II. 3. 4 (var.).

ये समानाः **28**, 10—12.

4 येह पितरः **26**, 16: vgl. Kāṭh. (altind. ahnenk. p. 256).

4 ये कृर्पणाः **24**, 8.

4 वनस्पतीनां गन्धः **16**, 14—16.

4 वनस्पतीनां पुष्पम् **16**, 17.

4 वनस्पतेस्त्वक् **16**, 13.

1 वामदेव्यम् **5**, 17; **13**, 16: bij JS. III. 4. 5.

वायो प्रायश्चित्ते **23**, 8: MBr. I. 4. 2 (var.).

वायो व्रतपते **13**, 5: MBr. I. 6. 10 (sterk afw.).

विह्रपात्रो ऽसि **2**, 17 (20); **9**, 1: MBr. II. 4. 6 (vele afw.).

विश्वा उत त्वया **22**, 3: MBr. I. 2. 5. b (var.).

विष्णोर्मनसा पूते **2**, 9: Gobh. 1. 7. 23.

विष्णुर्योनिम् **23**, 18—20: MBr. I. 4. 6.

4 वेदेषु यथास्वम् **15**, 1.

वेदो ऽसि **7**, 17.

व्याहृति **13**, 13; **32**, 20.

व्रतानां व्रतपते **13**, 7: MBr. I. 6. 13 (sterk afw.).

शण्डाय मर्काय **7**, 20: vgl. Pār. I. 16. 23.

4 शम्यसि **30**, 14.

शिवा नः शंतमा **17**, 12: vgl. Taitt. ār. I. 3 (9).

संवत्सराय परिवत्सराय **28**, 18: MBr. I. 1. 12 (var.).

1 सदसस्पतिमद्भुतम् **14**, 9; **32**, 8: JS. I. 2. 1. 6. 7.

सदसि सन्मे भूयाः **5**, 6: vgl. Kauś. sū. 136. 3.

1 सनादग्ने **32**, 9: JS. I. 1. 8. 8.

1 समन्या यन्ति **16**, 3: JS. II. 1. 6.

सं मासं प्रविश (!) **7**, 16: vgl. MBr. I. 5. 14. b.

3 समुद्रं वः प्रहिणोमि **5**, 12—15.

समृद्ध्यै स्वाहा **4**, 15; 17: Mān. II. 13. 6.

सरस्वति ऽनुमन्यस्व **3**, 14: Khad. I. 2. 19; Gobh. I. 3. 3 (var.).

सह नो ऽस्तु **14**, 5: Pār. II. 10. 22 (var.).

सामसावित्री **14**, 7; **32**, 21.

1 सावित्री **13**, 19; **14**, 2, 7; **31**, 14; **32**, 18: JS. IV. 3. 8.

सुमङ्गलीरियम् **22**, 10: MBr. I. 2. 14.

सूर्य प्रायश्चित्ते **23**, 10: MBr. I. 4. 4 (var.).

सोमः प्रथमः **21**, 4.

1 सोमं राजानम् **14**, 8; **32**, 21: JS. I. 1. 10. 1.

सोमाय पितृमते **26**, 2: MBr. II. 2. 1 (var.).

सोमाय स्वाहा **4**, 1.

सोमो ऽददत् **21**, 3: MBr. I. 1. 17.

4 स्वरभिवीख्ये **16**, 2: vgl. Khad. II. 5. 31.

स्वस्त्ययनो ऽसि **12**, 13; **17**, 21.

हिं भूर्भुवः स्वः । किं पश्यसि **7**, 4: MBr. I. 5. 5 (lichte var.).

हिं भूर्भुवः स्वरागत्वा **11**, 8: MBr. I. 6. 14.

हिरण्ययी अरणी **23**, 22.

# ADDENDA.

1. Slechts zeer zelden schijnt het Jaim. gṛhs. in de commentaren op verwante teksten geciteerd te worden. Ik vond het tot nog toe slechts éénmaal en wel in het onuitgegeven bhāṣya van Sāyaṇa op Baudh. darśapūrṇamāsa. Het bedoelde citaat, ingeleid door de woorden: *talavakārakalpe jaiminiś cāha*, luidt als volgt: *āhitāgneś cet pūrvaṃ jāyā mriyeta tāṃ nirmanthyena dahet saṃtapanena veti*. Het citaat wordt in onzen tekst gevonden op p. 30, r. 7. Voor Sāyaṇa is ons sūtra dus een tekst der Talavakāra's, dien hij toeschrijft aan Jaimini.

2. Hoewel zonder twijfel de ons overgeleverde tekst, vooral wat de mantra's betreft, hier en daar sterk bedorven is, heb ik toch gemeend geen verandering te moeten aanbrengen, waar de Subodhinī de corrupte traditie verklaart of liever tracht te verklaren. Zoo is bijv. zonder twijfel het mantra op p. 21, 16 bedorven. Volgens Prof. Kern, die zoo welwillend was de proef der eerste vellen te lezen, moet men i. p. v. *samavajīrṇāḥ* op p. 22, 19 veeleer *samavatīrṇāḥ* lezen. De Subodhinī verklaart echter °*jīrṇāḥ*.

3. In de lijst der mantra's zijn die welke in II. 9 gevonden worden, niet vermeld.